there would have been no reason for this faulty and meaningless passage. Again the word अथ even in the very first line of the opening stanza is incorrect. (See P. I. N. S. Ed.) There is no meaning in saying that " after the desired results, have been obtained by the rising of Lakṣmī, Candra and others, the Devas and Asuras again resumed the churning of the ocean." If what they desired, had been obtained already then there was no further necessity of continuing the very arduous process of churning the ocean. Hence the mistake in the expression लब्ध्वाथ लब्धेप्सिते was completely overlooked. The correct reading should be लब्ध्वाप्यलब्धेप्सिते. (See p. 1, this book.) For the entire object and aim of those who churned the ocean even after obtaining Lakṣmī and others, was the supreme goal of extraction of Amṛta. So the meaning of the correct reading runs like this " though Lakṣmī and others had been obtained by those who churned the ocean, their sole aim was to acquire Amṛta. Though Lakṣmī, Candra and Kalpaka-vṛkṣa had been obtained, as they had not yet achieved their desideratum that of acquiring Amṛta, they resumed churning the ocean." This is the exact idea of the author. Again the correct poetical text—अत्ताणं वि ण जाणाइ राजकज्जं कुदो उण। उम्मादो उवजावो वा एदस्सिं सत्तु हिं किदो ॥ (p. 392 in this book) has been distorted as a prose and that too in a meaningless and completely faulty way as अत्ताणं वि ण जाणादि राजकज्जं कुदो उण। उम्मादं वा उवजावं वा सत्तुकिदम्। (p. 93 N. S. Ed.) These and various other absurd and improper passages and ungrammatical words and sentences and irregularities scattered in N. Sagar book will be dealt with in a comprehensive manner in my comparative statement appended to my Sanskrit introduction भूमिका.

If I had stopped, simply by examining, revising, rewriting and editing the text in correct form, I felt that the

true value and utility of this rare classical literary-medical work, will still remain hidden from most Sanskrit-knowing readers, who by simply going through the text once, will not be able to take interest in and realize the importance and beauties of this work. Especially as this work deals mainly with the principles of medicine, those interested in literature, may not have predilection to read and appreciate its contents. Also as very significant and interesting literary matter is combined in many places with deep thoughts of Vedānta, for those medical men not well-versed and familiar with Sanskrit literature and religious philosophy, the mere text, would not be useful. So, in order that both these classes of readers may interest themselves in this work, I considered that it is very necessary to write a detailed commentary for this play, and to present it to the learned public along with the original correct text; accordingly I have written out such a complete commentary *Nandinī*.

Usually those who write commentary for most of the plays will only show out in detail, the various important meanings, figures of speech and other Nāṭaka-lakṣaṇas, but will not give a word by word meaning for all the passages. Many commentators, assuming a basic literary knowledge on the part of the readers of high classical works and dramas, do not deem it necessary to give a detailed paraphrase word by word of the verses and sentences of the concerned work. But my task in writing out a commentary for this extra-ordinary work is somewhat different from others. As I have already explained, the consideration that many medical men on the one hand, may not have sufficient proficiency in Sanskrit and literary absorptive capacity, and that the non-medical men on the other, may not be familiar with the medical technicalities, necessitated my giving detailed

paraphrase for almost all the passages as in the case of smaller classical works, word by word. I have also in the required places, pointed out clearly, as to which of the well-known poets and writers, Ānandarāya-Makhin has clearly followed in delineative style, comparisons and verse compositions and have written out the corresponding sentences or passages in the commentary. Of the wide use I made of the variant readings of the text in the previously mentioned Telugu copy of *Jīvānandanam* and of my own re-examinations with reference to contexts and of my further researches in this work reconciling the text differences in order to rectify the many mistakes and omissions found in the Nirnaya Sagar edition published fifty years ago, I have given suitable examples and explanatory remarks in the corresponding places in my commentary. Above all, the medical technicalities present in the work have been dealt with in an exhaustive manner, without reservation, giving authoritative statements in support of them, and the readers can find all the details even as regards all the diseases and their remedies and treatments that are cited in the text. In addition, all the allusive matter, hinted or insinuated in the suitable contexts present in the work in various places, have been explained and expanded with adequate and authoritative evidence. On the whole, I feel convinced that the readers themselves will realize the necessity of such a detailed and critical commentary, in that without it, any judicious literary man, who desires to somehow go through this play may not pick up immediate interest by just going through some parts of the text at a first attempt and that the inner and truly significant meaning conveyed by the passages, may not be readily apparent, to ordinary Sanskrit knowing public in sufficiently arresting manner.

After I read, corrected and revised the text of this drama from beginning to the end, and wrote a critical and exhaustive commentary, I used to wonder, whether, aware of its high value, realizing its merits and importance, any would come forward to make it alive and popular by printing and publishing it or as Bhartṛhari said, this medico-literary work of Ānandarāya-Makhin with my correction, revision and *Nandinī* commentary would in course of time vanish with me fruitlessly.[1] Then it was that my esteemed friend Vaidya-ratna Dr. G. Srinivasamurti, being the Director of Adyar Library, came forward unexpectedly to print and publish this work through the Adyar Library, and has now carried it through to its successful conclusion. This very kind initiative of his and the responsibility he undertook in bringing out this laudable and valuable work only illustrates and emphasizes, the great interest he takes, in developing our classical Sanskrit Literature. I convey to him my heart-felt thankfulness and appreciation for his part in bringing out this publication and assure him that his kindness and the spirit of encouragement will remain evergreen in my memory and in the memory of the readers of this worthy dramatic work. The management of the *Vasanta Press* of Adyar also deserves my sincere thanks and appreciation for their patience and fine printing work which they have executed without minding the tediousness of Sanskrit printing.

In conclusion I like to say that this work, which has been, after a good deal of research and critical study brought out up-to-date as far as possible, possesses all the improvements that are necessary for creating interest in

[1] बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् ॥

modern intellectual men. Only with a view to make this excellent play more popular and readable, I was obliged to write this very exhaustive Commentary *Nandinī* which has developed five to six times the size of the original text of *Jīvānandanam*. To write this out completely inclusive of some appendices I required more than five hundred foolscap sheets. I have tried my level best to make this work perfect in all respects. So, despite my carefulness in revising, re-writing and regulating, if any errors or mistakes have crept in, the whole responsibility for these will be mine only. I hope that this newly revised, well-brought out up-to-date publication of this valuable drama *Jīvānandanam* with its new Vyākhyānam *Nandinī*, will beget due and deserved appreciation from all those who interest themselves in and value such treasures of our ancient store-house of knowledge comprising Art and Science.

"ARYA GRIHAM" M. DURAISWAMI AIYANGAR
Vepery, Madras
12th May, 1947

॥ भूमिका ॥

'कति कति न सन्त्यकूपारे शङ्खाः किं ते परिष्कृत-पुरुषोत्तमपाणिपद्मः पाञ्चजन्यः' इति ह स्माह तत्रभवान् श्रीवेङ्कट-नाथः। एवमेवेह वयमप्यनुयुञ्ज्महे—कति कति न सन्ति संस्कृत-प्रपञ्चे श्रव्याणि दृश्यानि चास्माभिः पठनपाठनैराम्रेडितचराणि काव्यानि, किं तानि सरससंवलितसाहित्यवैद्यवेदान्तसारसमुद्भासकं सहृदयजन-जीवातु जीवानन्दनम्। जीवानन्दनं नाम, यत्सत्यम्, इदमेकमपूर्वं नातिचिरन्तनं नाटकम्। विदग्धस्य कवेः कल्पनानुरोधेन यथेदं राज्ञो जीवस्यानन्दनाय नाटकमवतीर्णं तथा मन्महे, जीवलोकस्य संस्कृतसारस्व-तास्वादलालसस्य हृदयानन्दनाय च सर्वथा संघटतामिति मनसि कृत्वैव कविरिदं रूपकं प्रणिनाय। सर्वे वयमिमे जानीमः, यदुत समतीतैः शतद्वयाधिकैर्हायनैः प्रायेण सुदुर्लभास्तादृशाः समभवन् सुकवयः, ये हि नाम सहृदयसंमोदप्रकर्षजनकस्य स्रष्टारः काव्यप्रपञ्चस्य। इदमपरं विशेष-ज्ञानामपि विस्मयावहम्, कवेरेकैकस्य च प्रतिनियतमसाधारणं वैदग्ध्यं नाम, यत्किल स्वसंवेदैकवेद्यं केवलं काल्पनिकं किमपि कथावस्तु केनापि भावनाप्रकारेण परिचितचरमिव, अदृष्टप्राप्तमपि दृष्टपूर्वमिव च नानारस-तरङ्गितैः संविधानविशेषैः संपूर्य, कविः काव्यप्रपञ्चसृष्टेः स्वात्मनः सार्वपथीनत्वमभिव्यञ्जयितुं तदेतन्नाटकात्मना पुरतोऽस्माकमर्पयति स्म।

एतादृशैः खलु स्फुरद्वाग्ब्रह्मभिः सुकविभिः समतीतेन संख्यातिगेन गणरात्रेण भारतं वर्षमिदं देव्या भारत्या विलासभवनमिव, जगन्नागरिकताया नाडिन्धमं स्थलमिव च विभाति। यशश्शरीरेण जीवद्भिः कविप्रकाण्डैरेतादृशैः सुकृतिभिरेव संसृतावधुनापि सुबहवोऽस्मदादयो मनुष्यधर्माणो व्यपगतमोहा व्यपदेशार्हवैदुष्याश्च सन्ति विलसन्तः। 'ते वन्द्यास्ते महात्मानस्तेषां लोके स्थिरं यशः। यैर्निबद्धानि काव्यानि' इति हि नामामनन्त्यभियुक्ताः।

असंस्तुतपूर्वकथावस्तुसंघटनपूर्वकं रूपकस्यास्य विरचने कविरानन्दरायमखी किमर्थम् आत्मना व्यवसितवानिति विचारपूर्वकविषयनिरूपणसरणौ वयमस्मन्मतिं सुदूरं व्यापारयामासिम। तथा बहुधा विमृश्य चान्ततो निर्णयकोटिरेषास्माभिरासादिता। तन्निर्णयानुरोधेन कविनोद्दिष्टं नाटकस्यास्य ग्रथनहेतुमपि भूमिकाया उपक्रमेऽत्र संक्षिप्योपपादयामः। विदितचरमेवेदं साहितीसरणिसंचरणसमुत्तेजितमतीनां भावुकमणीनाम्, यत् श्रव्यकाव्यकीर्तितैः कथावस्तुभिः प्रेक्षकाणां चक्षुस्सन्तर्पणमपि चिकीर्षुभिः कालिदासभवभूतिप्रभृतिभिः प्राक्तनैः कविभिः श्रृंगारवीराद्यात्मकैः सामान्यजनानुभाव्यै रसैरापूलुतानि नाटकाख्यानि दृश्यकाव्यानि च प्रागसृज्यन्त। विषयं तमेव स्पष्टतरमभिदध्महे—ते हि महाकवयः पौराणिकानि ऐतिहासिकानि मूलैरपरापरैरुपलब्धानि च कथावस्तूनि समवलंब्य दृश्यकाव्यानि स्वकीयानि निरमिमत। गच्छता च कालेन मेधाविशेषविवर्धितकल्पनाचातुर्यैः साहित्यघण्टापथसन्ततकृतगतागतैः वेदान्तसिद्धान्तसारास्वादविशुद्धान्तःकरणैः श्रीकृष्णमिश्र-श्रीवेङ्कटनाथादिभिः अश्रुतपूर्वाणि अमानुषव्यक्तिमयानि मानवानां सद्गुणदुर्गुणात्मकानि पात्राणि परिकल्प्य, साहित्यवेदान्तविषयसंवलितानि सरसशान्तरससंप्लुतानि प्रबोधचन्द्रोदय-

सङ्कल्पसूर्योदयादीनि[1] नाटकानि नागरिकाणां हृदयावर्जकानि प्रणीतानि। नैतानि नाटकानि याः काश्चन कथाः पुराणादिषु प्रसिद्धाः समनुरुध्य व्यरचिषत; किंतु सर्वथा काल्पनिकानि, मानुषगुणाहितपात्रप्रस्तुतकथावस्तुसंघटितानि च भवन्ति। अतः प्रबोधचन्द्रोदयादीनि रूपकाणि स्वरूपतः सुतरामभिनवानि, नाटकान्तरेभ्यो विलक्षणानि चेति विदन्ति विमर्शकाः। जीवानन्दनमपि स्वरूपतस्तदनुरूपं किमप्यभिनवं रूपकम्। किञ्च, अस्य नाटकस्य निर्माणे हेत्वन्तरमप्यास्ते, यदत्र विवृणुमः। अत्र निर्दिष्टपूर्वयोः नाटकयोः सुस्पष्टतया यद्यपि प्रथमम् अद्वैततत्त्वप्रतिपादनपरम्, द्वितीयं च विशिष्टाद्वैतसारसर्वंकषं भवति, तथापि कृतिद्वयमप्येतत् विष्णुभक्तिमेव विशिष्टपात्रेष्वन्यतमां परिकल्प्य, निगमान्तगुरुरिव कृष्णमिश्रश्च विष्णोरेव परत्वं प्रकाशयति[2]। अयं कविरानन्दरायमखी तु

[1] अत्र आदिशब्देन कविनानेनैव विरचितं विद्यापरिणयाख्यं नाटकम्, रङ्गखेटश्रीनिवासदीक्षितप्रणीतं **भावनापुरुषोत्तमं** नाम नाटकं च गृह्येते। विद्यापरिणयप्रस्तावनायां 'कृष्णमिश्रप्रभृतिभिरत्र प्रबोधचंद्रोदयम्, सङ्कल्पसूर्योदयम्, भावनापुरुषोत्तमम् इति न्यबन्धि नाम बहुधा प्राचीनैः' इति कविरेष एव स्मरति नाटकान्तरविषयम्।

[2] **प्रबोधचन्द्रोदये**—"शुक्तौ रूप्यमिव ह्यजीव भुजगः स्वात्मावबोधे हरावज्ञाते" (६-२२) इति, "असौ त्वदन्यो न सनातनः पुमात् भवान्न देवात् पुरुषोत्तमात् परः" (६-२५) इति, "मोहान्धकारमवधूय विकल्पनिद्रामुन्मथ्य कोऽप्यजनि बोधतुषाररश्मिः। श्रद्धाविवेकमतिशान्तियमादिकेन विश्वात्मकः स्फुरति विष्णुरहं स एषः" (६-३०) इति, "सर्वथा कृतकृत्योऽस्मि भगवत्या विष्णुभक्तेः प्रसादात्। सोऽहमिदानीम्" (६-अङ्कावसाने) इति च श्रीकृष्णमिश्रः पारम्यं विष्णोः सुव्यक्तं प्रतिपादयति बहुषु स्थलेषु। अथ **सङ्कल्पसूर्योदये च**—"मेयं विष्णुर्वेदवादाश्च मानम्" (१-८५) इति, "सत्यं सत्यं च सत्यं पुनरिति कथयन् सादरं वेदवादी पाराशर्यः प्रमाणं यदि क इह परः केशवादाविरस्ति" (१-९०) इति, "पुरा वेधःस्तम्बावधिपुरुषसृष्टिस्थितिमति स्थिरा भक्तिः सूते विपदुपरतिं पुंसि परमे" (१-८५) इति, "परः पद्माकान्तः प्रणिपतनमस्मिन् हिततमम्" (१-९४) इत्येवमादिभिः श्रीनिगमान्तगुरुरपि विष्णुमेव परतत्त्वं विशिनष्टि। दृश्यतां च प्रबोधचन्द्रोदयस्य प्रथमाङ्कः सङ्कल्पसूर्योदयस्य च दशमाङ्कः यत्र हि विष्णुभक्तिः प्रधानपात्रत्वेन प्रविश्य, परमपुरुषस्य स्वरूपम्, मुमुक्षूणां भगवति श्रियःपतौ प्रतिपत्त्या आवश्यकतां च प्रकटयति।

परममाहेश्वरः। एष च विष्णुपारम्ये विसंवादमात्मनः प्रचिकटयिषुः स्वप्रणीते विद्यापरिणयनाटके प्रथमाङ्क एव प्रथमपात्रत्वेन परमेश्वरीपराधीनवृत्तिं शिवभक्तिं प्रवेशयित्वा शिवपारम्यसमर्थनाय व्यवस्यति स्म। एवं पारमेश्वरवैशिष्ट्यगुम्भनपुरस्सरं स्वाभीष्टमद्वैतवेदान्ततत्त्वमायोज्य नवीनं नाटकमेकं विबुधजनानां पुरतो विनियोज्यमिति मनस्यभिसन्धाय विद्यापरिणयमेष कविः प्रणिनायेति तद्ग्रन्थोपलब्धाभिरुपपत्तिभिरवगच्छामः[1]।

अथ विचक्षणमतिरेष कविर्विलक्षणसंविधानक्रमविशिष्टस्य शिष्टसहृदयजनावर्जकस्वरूपस्य नाटकान्तरस्य निर्माणमाचकाङ्क्ष। तत्र चायुर्वेदशास्त्रपरस्याश्रुतचरस्य कव्यन्तरैरचिन्तितपूर्वस्य वस्तुनः संघटनेन वस्तुतः स्वात्मानमन्यादृशं कविं कृतार्थमन्यं च विशदयितुमनाः प्रशस्तमिदं जीवानन्दनं नाम नाटकं रचयामास; येन च उत्पश्यामः, न केवलं संस्कृतसाहित्यकला, नापि केवलं वेदान्तसिद्धान्तरहस्यम्, अपि तु आत्रेयादिभिरादिमैराचार्यैः प्रवर्तितमायुर्वेदशास्त्रं च नूनमभिनवां कामपि प्रशस्तिं मध्येपण्डितलोकं प्रत्यपद्यत। महानेष कविः श्रीमहाविष्णोः परदेवतात्वप्रतिष्ठापकं सकलविद्वज्जनमहितमहावेदान्तिद्वयप्रणीतं निर्दिष्टपूर्वं नाटकद्वयमिव शिवाद्वैतविद्योतके विद्यापरिणयजीवानन्दनाभिधे द्वे रूपके प्रणीय, नैजं परममाहेश्वरत्वं सर्वजनविदित-

[1] दृश्यतां विद्यापरिणये प्रथमाङ्कस्यारम्भ एव प्रस्तावनानन्तरं 'ततः प्रविशति शिवभक्तिः' इत्यादिकम्। किंच 'श्रुतिस्मृतीतिहासागमतन्त्रादिसिद्धनानाविधसांबशिवचरणपरिचरणतदनुसंधाननिरन्तरितनिखिलवासरस्य ..... शरभमहाराजमन्त्रिशिखामणेरस्य' इति विद्यापरिणयप्रस्तावनावाक्यं कवेरस्य वीरशैवत्वप्रतिपादकेषु तत्प्रयुक्तेषु वचनेष्वन्यतमम्। अधो निर्दिष्टं कवेरस्य पद्यमपि परममाहेश्वरत्वमस्योपष्टम्भयति—

कोणे यस्य जगत्यमूनि जलधेर्डिण्डीरजालोपमं
जन्मस्थेमलयान् भजन्ति सहरिब्रह्मादिमृग्योऽपि सन्।
लोकस्यानुजिघृक्षया धृतवपुः शक्त्या स्वयान्यया
स श्लिष्टो जगदम्बया पशुपतिः कुर्वीत वां मङ्गलम्॥
(वि. परि. ७-२०)

मन्वर्थयितुं चाचकाङ्क्षेत्यभिप्रैमः । वस्तुतत्त्वमिदं प्रस्तुतनाटकस्यामूलादाचाग्रात् सावहिति सकृदवलोकनतः साधु संख्यावद्भिरवधार्येत[1] । रूपकस्यास्य निर्माणे कविरयं यद्यपि प्राधान्येन प्रबोधचन्द्रोदयं सङ्कल्पसूर्योदयं च, विश्वसिमः, आदर्शत्वेन स्वयं समाददे, तथापि तयोर्नाटकयोः नाटके चास्मिन् संघटितानां पात्राणां स्वरूपेषु परिशील्यमानेषु, ताभ्यां प्राक्तननाटकाभ्यां जीवानन्दनमिदम्, जानीमः, किंचिदिव भिद्यत इति । स चैष भेदः । तनुभृतां सदसत्प्रकारान् गुणान् पात्रीकृत्य, अपवर्गम् आहोस्वित् मुक्तिमेवाग्रिममन्तिमं च फलमभिसन्धाय कृष्णमिश्रनिगमान्तगुरुभ्यां प्रणीतमासीत्तन्नाटकद्वयम्; सुलघु निगमान्ततत्त्वावबोधनाय च तद्वयं प्रवृत्तम्। इदं जीवानन्दनं तु मानवानां मानसिकैः सदसद्गुणैः सह रोगानीकान् एकत्र, भेषजवर्गान् अपरत्र च पात्रत्वेन प्रकल्प्य, शरीरारोग्यसाधकं त्रैवर्गिकं धर्ममेव फलमपश्चिमं विनिश्चित्य विरचितमास्ते । किं च पुरुषगुणेषु प्रशस्तो विषयविमर्शनविचक्षणो विवेकस्तयोः कथानायकः । अस्मिंस्तु नाटके शरीरधारकः साक्षाज्जीव एव कथानायकपदमधिरोपितः । अपि च पूर्वयोस्तयोर्नाटकयोः पुरुषस्यापवर्गसिद्धये विष्णुभक्तिरेव प्रभविष्णुरिति प्रत्यपादि; अत्र तु सर्वथा शिवेतरक्षतिः निःश्रेयसावाप्तिश्च शिवभक्तयैव सिध्यतीति निर्धार्यते ।

परमेश्वरस्य पारम्यप्रदर्शनमात्रेण पारं मनोरथस्यासादितमिति कविरानन्दरायमखी नैवामंस्त । आयुर्वेदशास्त्रस्य तलस्पृगेष कविः स्वकीयेन

[1] दृष्टान्तार्थं दृश्यतामधो निर्दिष्टो जीवानन्दनस्थो विषयः—

विधिहरिविषमेक्षणात्मकः सन् सृजति बिभर्ति निहन्ति यो जगन्ति ।
तदहममलमेकमेव सच्चित्सुखवपुषं परमेश्वरं नतोऽस्मि ॥ (७-२०)

जीवानन्दनस्यान्तिमपद्यस्यान्तिमः पादश्च परमशैवत्वं कवेः प्रदर्शयति । यथा—'भूयादस्य कवेश्चिरायुररुजो भक्तिश्च शैवी दृढा' इति । शिवपारम्यस्य शिवभक्तयाश्च प्रकटनपराणि सन्त्येवंविधानि बहून्यपराणि च वाक्यानि जीवानन्दने ।

वैदग्ध्येन वैद्यशास्त्रस्य सारभूतानंशान् सरसधिषणेभ्यो भिषग्भ्यस्तदितरेभ्यश्चाभिनवया रीत्या स्वयमुपजिहीर्षुः सुनिपुणमायुर्वैदिकं रूपकमिदं जग्रन्थ; येन किल "न तच्छास्त्रं न सा विद्या न तच्छिल्पं न ताः कलाः। नासौ योगो न तद्ज्ञानं नाटके यन्न दृश्यते" इति सुप्रथितं सुभाषितं परामृशद्भिः परार्ध्यमतिभिः वैद्यविद्यापि हृद्या रङ्गस्थलप्रदर्शनार्हा सहृदयचक्षुस्संतर्पणसमुचितेति च परिगण्येत। एष च उत्प्रेक्षामहे, कवेरभिसन्धिः, यदुत वैद्यशास्त्रस्य तत्त्वानामेवं नाटकरूपेण प्रेक्षकेभ्यः पाठकेभ्यश्च प्रतिपादनेन भावुकानामनभ्यस्तवैद्यतन्त्राणाम् अपरेषामपि परिष्कृतमतीनामेतस्मिन्नाटक इव नानाविधामयाभिभूतजनानुकूल्यनिर्वहणक्षमेषु वैद्यशास्त्रसंबन्धिषु विषयेषु च यादृच्छिकी प्रवृत्तिरानुषङ्गिकी चाभिरुचिः संपद्येतेति। सुबहूनि पौराणिकानि, नैकविधान्यैतिहासिकानि, भूयांसि च नूतनकथासंघटितानि, कतिपयानि च वेदान्तार्थसमुद्भाटकानि नाटकानि प्रचारे सन्तीति समालोच्य, तथा बहुभिः पूर्वैः क्षुण्णचरं विषयमशेषमप्यवपीडितसारमित्यनादृत्य सर्वातिशायि कथावस्तुना, अन्यादृशं रसेन, अभिनवं च विषयतत्त्वेन यत् स्यात् तादृशं विलक्षणं नाटकं विचिकीर्षुः कृती कविरेष सर्वात्मना स्वकपोलकल्पितां वैद्यशास्त्रतत्त्वोन्मेषपरां कृतिमिमां स्वात्मना प्रणिनायेति प्रतीयते। शास्त्रान्तरेभ्योऽपि वैद्यशास्त्रमेव मानवानामेकान्तहितावहमिति विमृश्य, साहित्यरसास्वादस्निग्धमनसो मनीषिणश्च सर्वे तत्त्वान्यायुर्वैदिकानि स्वयमास्वाद्य तदुपजनितं फलमपि निकाममनुभवन्तु नामेति विदितवैद्यशास्त्रप्रयोजनस्य दुस्स्थितजनपक्षपातिनः कवेरस्य करुणोत्तेजिता चित्तवृत्तिरेव, अनुमिमीमहे, पर्यणमदेतन्नाटकात्मनेति।

किञ्चिदिवाथ प्रासंगिकतया कोणान्तरे दृष्टिं प्रवर्तयामः। रसलोहधातुप्रभृतिभिः साधितानां चिरस्थायिनां कृच्छ्रसाध्यामयापनोदनक्षमाणां

महार्घाणामौषधविशेषाणां तंजापुरराजभवनं निधिस्थानमावहदिति शतद्वयवत्सरेभ्यः प्रागेव प्रथितमासीत्। तादृशैः प्रशस्तौषधैः संघटितः कश्चिदौषधालयः, विद्याभिवृद्धौ बद्धश्रद्धयोः सहाजिशरभोजिमहाराजयोः प्रोत्साहनेन साहाय्येन च संपादितैः सुबहुभिरुत्तमैर्वैद्यग्रन्थैः संपन्नो धन्वन्तरिमहाल् इति प्रथितो ग्रन्थालयश्चैको विश्वस्मिन्नपि लोके विश्रुतेन सरस्वतीमहाल्कोशागारेण समं स्थापितो व्यलसदिति च ब्रुवते बहवः। इदमप्यभिधीयते, यत् तंजापुरराजभवनमन्तरा तादृशवैद्यशाखायाः प्रतिष्ठापनप्रवर्तनादीनाम् उपक्रमोपबृंहणयोरपि महतीं धुरामानन्दरायमखी धर्माधिकारी भूत्वा स्वसहचरैरनुचरैश्च साकं स्वयमवहदिति। सप्तदश्यां क्रैस्तवशताब्द्यां शाहभूपतौ शरभोजिमहाराजे च शासति तंजापुरराज्यं कृत्यविदेष कविः स्वयममात्यो धर्माधिकारी च भूत्वा सुबहूनामातुराणाम्, दौर्गत्याभिभूतानाम्, पण्डितप्रकाण्डानां च विविधैः प्रकारैरसकृदुपाकरोदिति च शृणुमः।

माहाराष्ट्रा राजानः स्वविक्रमेण तंजापुरराष्ट्रमाक्रम्य स्वायत्तीकृत्य च तत्, षट्सप्तत्यधिकषट्छतोत्तरसहस्रतमात् क्रैस्तवाब्दादारभ्य (१६७६) किञ्चिदूनं शरदां शतद्वयं यावत् अनुस्यूतेनाशिषन्। तस्मिंश्च चिरदीर्घे माहाराष्ट्रीये प्रजानामाशंसनीये शासनकाले प्रवर्तमाने न केवलं तद्राज्यं वीतोपप्लवं सद्धर्मानपेतं संपदा समृद्धं सुखेन निर्वृतं चाभूत्, परं तु विद्यापक्षपतिनः सुतरां भूष्णवश्च ते भूपतयः परश्शतान् विपश्चिदपश्चिमान् कविश्रेष्ठानपि पुपुषुः, पुरस्कारैरपि नैकविधैः प्रोत्साहयामासुः। पूर्वे नायकवंशजा राजानः—शवप्पः, अच्युतप्पः, रघुनाथः, विजयराघव इत्येते पञ्चत्रिंशदधिकपञ्चशतोत्तरसाहस्रात् (१५३५) क्रैस्तवाद्धादारभ्य, त्रिसप्तत्यधिकषट्छतोत्तरसहस्रतमं (१६७३) वत्सरं यावत् (प्रायश्चत्वारिंशदधिकं शरदां शतम्) राज्यस्यास्य समभवन् शासितारः। अथ माहाराष्ट्रैर्नृपति-

भिराक्रान्तेऽस्मिन् राष्ट्रे, संपत्समृद्धिः विद्याभिवृद्धिश्च राजगृह इव समन्ततोऽपि राज्येऽस्मिन् पूर्वतोऽपि पुपोष पुष्कलताम्। तंजापुरराष्ट्रे प्रभुरेकाजिः प्रथमः, सहाजिः, शरभोजिः प्रथमः, तुकाजिः प्रथमः, एकाजिर्द्वितीयः (य एव भावासाहब् इति च विश्रुतः), प्रतापसिंहः, तुकाजिर्द्वितीयः, अमरसिंहः, शरभोजिर्द्वितीयः, शिवाजिः इत्येते दश महाराष्ट्राधिपतयो हायनानि किञ्चिदुच्चावचानि अशीत्यधिकानि शतसंख्याकानि (१६५६-१८५५) अविच्छिन्नतया राज्यधुरामवहन्, प्रजानां श्रेयश्च प्राज्यमापादयन्। एतेषु च शासकेषु सहाजिः, प्रथमद्वितीयौ शरभोजिमहाराजौ, तुकाजिः, एकोजिर्द्वितीय इति पञ्चाप्येते न केवलं विदुषो विश्वतोमुखैरुपकारैरतर्पयन्, परं तु स्वयमपि राजकवय इति विबुधगोष्ठीषु च विश्रुता व्यराजन्। राज्ञामेतेषां बहून्यपदानान्तराणि इतोऽपि विशदतयास्मदीयायाम् आङ्गलभूमिकायां सन्ति प्रपञ्चितानि, यत्र च पाठकमहाशयैराधीयेतावधानमिति वयमाशास्महे।

अथ कवेरस्यात्मीयमितिवृत्तं कियता विवृणुमः। अयमानन्दरायमखी जीवानन्दनकर्ता पावनं यज्वनामन्ववायं स्वजन्मना पुनरभ्यर्हिततरमकार्षीत्[1]। स्वयमप्येष यायजूकः। नाटकस्यास्य प्रस्तावनायां 'येनाकारि सहस्रदक्षिणमखः' इति खलु स एव स्वस्येज्याशीलत्वमात्मना प्रख्यापयति। स एष साहित्यकलकण्ठसौहित्यापादकः प्रमदवनदेशः, विविधानां शास्त्रतत्त्वसारस्रोतसां सरस्वान्, कविताकुसुमलताया आश्रयो महामहीरुहः, ज्ञानविज्ञानमुक्ताविद्रुमाणां प्ररोहभूमिरिति च तत्काले तस्य यशो जनपदे समन्ततो व्यानशे। एवं समधिगतनैकविधतन्त्रप्रावीण्येन तेन

[1] 'नानापूर्वमहाक्रतुप्रणयनैरध्यात्मसंदर्शनैः' इत्यादिभिः स्वपूर्वजानां यज्वत्वं विद्यापरिणयेऽपि विशदीकृतमास्ते।

साम्राज्यनिर्वहणसामर्थ्यमपि साधु संपादितमासीत् । एतादृशं च योग्यतावैशिष्ट्यम् एकतः स्वार्जितस्य सार्वपथीनज्ञानस्य बलेन च, अन्यतः स्वपितृपितामहादिपरम्परानुसृतसाचिव्यानुभवसंधुक्षितमतिप्राभवेन च, ज्ञायते, सोपपत्तिकमानन्दरायमखिनमाससादेति; येन च, जानीमहे, शरभोजिसहाजिमहाराजाभ्यां सविस्रम्भमस्मा अमात्यपदमुपाह्वियत । अयमध्वरी कालेऽदसीये कुत्राप्यश्रुतदृष्टपूर्वमध्वानमात्मनश्चारित्रकं कमप्यालम्बे । सा चैषा चारित्रपद्धतिः । कविरयं स्वयं वैदिकः कर्मठः सन्नपि, विप्रो भूत्वापि, वीराणामभवदग्रणीः[1] । अतश्च स्वत एव सति समये रणाङ्गणेऽपि सांयुगीनो भूत्वा, स्वयमभ्यमित्रीणः सन् साहभूपतिप्रभृतीनां साहाय्यमपि व्यधाद्बहुधा । विषयानिमानेवास्मदीयेन पद्येनैकेन प्रदर्शयामः—

साहित्येऽपि सुकाव्यलेखनविधौ वेदान्तशास्त्रेऽप्यसौ
यज्ञानां विधिवद्विधानविषये श्रुत्यर्थनिर्वर्णने ।
आयुर्वेदकलाविमर्शसरणौ धर्माधिकारे महा-
मात्यस्यापि पदे स्वतन्त्रगतिमान् युद्धेऽप्यभूद्वीर्यवान् ॥

एवंविधैरात्मनि संचितैर्गुणैः स्वकीयाय राज्ञे, तदधिष्ठिताय राष्ट्राय, तदाश्रिताय पण्डितमण्डलाय च स विशेषज्ञो विविधैः प्रकारैरभवदुपकारपरः । नित्यं मृत्युंजयसेवानिरतेनानेनानन्दरायमखिना एकाजीमहाराजमन्त्रिवरो नृसिंह्रायमखी सत्पुत्रवान् बभूव । गङ्गाधरमखिनश्चायं पौत्रः । भारद्वाजान्ववायश्चात्मनो जन्मना समलङ्कृतः । अस्य जाया नाम्ना जयन्ती नाम । आत्मजश्चास्य नृसिंह्रायः । विद्वज्जनमध्ये विश्रुतप्रभावस्य रामभद्रदीक्षितस्य

[1] 'दीनजनाधीनदयो विहरति **समरे च विक्रमार्क** इव' (p. 8) इति, 'यद्दीनेषु दयां करोति **समरे शौर्यं** यदालम्बते' (p. 10) इति च नाटकस्यास्य प्रस्तावनायामयमेव कविर्विषयमिमं विशदयति ।

समकालिको भगवन्तरायनामा विपश्चित् कवेरस्य पितृव्यः । त्र्यम्बकराय-यज्वा नाम कविप्रकाण्डश्चास्य कनिष्ठो भ्राता । जीवानन्दनमिव विद्यापरि-णयाख्यं शैवाद्वैतप्रकटनपरं नाटकान्तरमपि प्रणिनायेति प्रागेवाचक्ष्महि । आश्वलायनसूत्रवृत्तिं नाम ग्रन्थमप्यसौ जग्रन्थ । १७२५ क्रैस्तवशके मधुराधिपतेर्तायकनृपतेः, पुदुकोटाराष्ट्रीयतोण्डमान्प्रभोश्च समवेतं सैनिक-द्वितयमपि युगपत् अस्यैवाभिक्रमप्रख्यापितविक्रमस्यायोधननैपुण्येन युधि पराजितमभूत् । सहाजिराजस्य (शाहभूपतेः) राज्यशासनकाले जीवानन्द-नमिदमानन्दरायमखी प्रणिनायेति प्रतीयते । अस्यात्मजेन नृसिंह्रायेण त्रिपुरविजयचम्पूकाव्यम्,[1] पितृव्येण भगवन्तरायेण राघवाभ्युदयं नाम नाटकं च व्यरचिषाताम् । अतश्चेदं सुस्पष्टमवगम्यते, यत् नैष केवलमानन्द-रायमखी, अपि तु तस्य पूर्वजाः पितृपितामहादयः, तदानन्तरिका आत्म-जादयश्च कृतमतयः पण्डिताः कवयश्च भूत्वा भारद्वाजकुलपरम्परामेव तदात्वे भारतीसंचरणसमुचितां पदवीं विधाय विशिष्य भासयामासुः ।

हायनानां शतद्वय्याः पूर्वं क्षिप्रप्रवहणयोग्यानां यानानामभावात्, मार्गाणामपरिष्कृतत्वाच्च दवीयसि निविष्टेभ्यो नगरजनपदादिभ्यो गमनागम-नक्रिया जनानाम्, जानीमो नैवासीत् सुलभा । जनपदाज्जनपदं सत्स्व-प्येवं प्रतिहतप्रसरेषु जनेषु, आनन्दरायमखी तदनुचराः पण्डिता-श्चापरे सोत्सुकं दक्षिणतः सुदूरमुत्तरापथे यात्रामारचय्य, न केवलं भागीरथी-तीर्थोदकस्नानपूता बभुवुः, किंतु वारणसीप्रभृतिविद्यास्थानेभ्यो बहुमूल्यान् संख्यातिगान् ग्रन्थानपि संपाद्यानीय च तंजापुरराजभवनस्थं ग्रन्थालयमपूर्व-कोशसंचयैः सुतरामाढ्यमप्यकुर्वन् । अस्य च जीवितकालः क्रैस्तवशकेऽष्टा-दशशताब्द्याः पूर्वभाग इति सम्यगवगतमेव । अष्टादशशताब्द्या अवसाने

[1] दृश्यतामस्य कोशस्य ५२ पुटः ; यत्र चम्पूकाव्यादस्मादुद्धृतं पद्यमेकं काव्यस्य तस्य दर्शनाकाङ्क्षां च सर्वेषां समुत्पापयेत् ।

सहाजिपुरमधिवसन् कुट्टिकविनाम्ना प्रथितो रामस्वामीनामा विद्वद्धौरेयः स्वकीये महिषशतकाख्ये मनोहरेऽन्यापदेशकाव्ये कवेरानन्दशयमखिनः पञ्चत्वं सविषादं स्मरति[1] । प्रथमतुकाजिमहाराजे राज्यं शासति, तदाधिपत्यस्यान्तिमे काले कविरेष कालधर्ममवापेति च निर्धार्यते ।

अद्यास्य नाटकस्याभिनवमुद्रणप्रकाशनप्रयासः कुतोऽस्माभिरादृत इति कैश्चिद्विषयजिज्ञासाकुतूहलिभिर्नूनमनुयुज्येत । अद्धा प्रश्नस्तु सुकरः श्रद्धालूनाम् । न केवलमुत्तरदानमत्र नैव सुशकम्; अपि तु सुदीर्घप्रवचनेन यथावत् समाधानं चायमर्हति । अत्र प्रत्युत्तरप्रतिपादनप्रकार एव नाटकस्यास्य संस्करणप्रयोजनमाविष्करणफलमपि युगपत् प्रकाशयेत् ।

साहित्यसंपत्संवलितं वैद्यशास्त्रतत्त्वसमुद्भासकमन्यादृशस्वरूपमिदं नाटकं साहित्यकलायां वैद्यशास्त्रे च यथावदाहितश्रमैः आनुभविकपरिचयपरिष्कृतधिषणैः तलस्पृगुपलब्धिमद्भिः वैद्यविद्वद्भिरेव यथावदवबोद्धुं पार्यते । ग्रन्थस्यास्य रसवत्ता च तादृशैरेव सहृदयैः काममभिनन्द्येत । पञ्चत्रिंशद्वत्सरेभ्यः पूर्वं जीवानन्दननाटकमिदं १८९१ क्रैस्तवाब्दे निर्णयसागरमुद्रालयमुद्रितं सकौतुकं यदृच्छयाहमध्यगच्छम्; यदा च मद्रपुरायुर्वेदकलाशालायाम् (मदरास् यस्. के. पि. डि. आयुर्वेदकलाशालेति तादात्विकं नाम) वैद्यशास्त्राभ्यसनस्यावसानसीमामप्यहमासम् आरोहन् । अपूर्वकथावस्तुसंघटितं रससंस्थुलं रूपकमिदं वस्तुतो मनो मे तदा बलवदावर्जयति स्म । तथापि निर्णयसागरीयकोशे तस्मिन् मुहुरामूलादा चावसनात् अवलोकिताः सुबहवो मुद्रणदोषा अन्येऽप्यपभ्रंशास्तद्ग्रन्थगुणानामशेषाणा-

[1] एकाजिप्रभुचन्द्रभानुशहजीन्द्रानन्दरायादयो
विद्वांसः प्रभवो गताः श्रितसुधीसंदोहजीवातवः ।
विद्यायां विषबुद्धयो हि वृषलाः सभ्यास्त्विदानींतनाः
किं कुर्वेऽम्ब कृषे व्रजामि शरणं त्वामेव विश्वावनीम् ॥ (महिषशतके.)

मप्यनुभवादस्मान् न्यवारयन्, विकलिताशानप्यातन्वन्। अथ चातिपतति कियति काले, मत्प्रियसुहृदां घण्टाशतबिरुदाङ्कितानाम् (अद्य देवभूयं गतानाम्) आत्मकूरुश्रीनिवासाचार्यमहाभागानां सविधात् आन्ध्रलिपि-मुद्रितं नाटकस्यास्य पुस्तकान्तरं दैवादुपलब्धम्; यच्च नातिदुष्टमिति दृष्टम्। तत्तु निर्णयसागरकोशादपि वर्षदशकात् प्रागेव महीशूरपुरे मुद्रितम्[1]। एतत्कोशावलोकनानन्तरं नाटकेऽस्मिन् सुबहुषु विषयेषु नः संदेहनिर्णयः संजातः। अस्य कोशस्य च साहाय्येन जीवानन्दनविमर्शकर्मण्युद्युक्ता वयं निर्णयसागरकोशेऽस्मदायत्ते नैकेषां दोषाणां शोधनम्, विषयाणां विपर्यस्त-रूपाणां सुबहूनां परिष्करणं च विधाय, तस्मिन् काले चान्ततः पद्यमे-कमपि प्रत्यभिज्ञानार्थं तस्मिन् पुस्तके व्यलिखाम। तदेतत् अस्मदीयाङ्ग-लभूमिकायां दृश्यताम्[2]। एवं सविमर्शं संशोधितः स कोश एव सपरिष्कार-मामूलात् पुनरस्माभिरेव प्रतिलिपिमारोपितः; य एव च सांप्रतमेतत्पुस्त-कात्मना मुद्रणस्य मूलमभवत्; येनैव च नन्दिनीव्याख्याया विरचने मह-दस्माकमानुकूल्यमपि संजातम्। अभिरूपभूयिष्ठस्य रूपकस्यास्य हृदयङ्गमा अकृत्रिमा गुणा एकत्र, निर्णयसागरमुद्रालयकोशे समवलोकिताः संख्यातीता अपभ्रंशा अपरत्र च साधुपरिष्कृतस्य नाटकस्यास्यैवम् अभिनवमुद्रणेऽप्या-विष्करणे च प्रधानं कारणद्वयमभूदिति निवेदयामः।

अस्य रूपकस्य स्वरूपं गुणान् प्रयोजनानि च पूर्वमेव प्रादर्शयाम प्रदर्श-यिष्यामश्चाग्रे विशिष्य। निर्णयसागरमुद्रालयमुद्रणेन कथमस्य गुणा अभि-भूता इति संप्रति निरूपयामः। तन्मुद्रालयात् बहिरागतस्य जीवानन्दनस्य दुर्गाप्रसादः काशीनाथपाण्डुरङ्गपरब इत्येतौ द्वौ पण्डितौ संपादकौ अभूताम्।

[1] आन्ध्रलिपिमयमिदं पुस्तकं बालेन्दुपुरवासिनः रामस्वाम्याचार्याख्यवैद्यस्यान्ते-वासिना मुद्दल् व्यासाचार्येण महीशूरपुरे सद्विद्यामन्दिरमुद्राशालायां १८८१ वत्सरे मुद्रितम्।

[2] अस्मदीयायाम् आङ्गलभूमिकायां १३ पुटोऽधस्तात् टिप्पणी च दृश्यताम्।

साहित्ये चायुर्वेदे च तयोः परिचितिं परिमिततमामेव तस्य मुद्रितरीतिः, परिष्कारप्रकारश्च प्रकाशयतः । द्वित्रशास्त्रार्थानाम् अन्योन्यगुम्भनचमत्कारोपजनितगुणविशेषैः समन्वितस्य अनितरसाधारणस्यास्य नाटकस्य यथावत् संस्करणमुद्रणयोरक्षमाविमौ पण्डितौ न केवलमामूलात् समन्ततो दोषैरापूरितमिमं ग्रन्थमतनिषाताम्, किंतु सादिनमात्मनः पृष्ठात् पातयित्वा तन्निखनाय गर्तखननोद्यतस्य धूर्तघोटकस्य दुर्विनीतिक्रममनुरुन्धन्तौ रूपकेऽस्मिन् दोषारोपणमपि निश्शङ्कं तावतन्वताम् । "जीवानन्दने नास्ति कवित्वचमत्कारः" इति हि नाम गुणहीनत्वमत्रारोप्य तावात्मनोरविमृश्यलेखकत्वमेव सुतरामाविरकुर्वाताम्[1] । अनुपपन्नमनयोः संपादकयोः तदेतद्दूषणवचनम् अस्माकमतितरां विस्मयं व्यथामप्युदपादयत् । ग्रन्थशोधनपद्धतौ वा, विमर्शपूर्वकं विषयाणां गुणदोषनिर्णयमार्गे वा पण्डिताविमौ नैवात्मीयां स्वतन्त्रां मतिं प्रवर्तयितुमपि क्षमाविति सोपपत्तिकमनन्तरमवगतमस्माभिः । कीत्नामा पाश्चात्यपण्डितश्च संस्कृतनाटकान्यधिकृत्यात्मना विरचिते पुस्तके (आङ्गलभाषामये) क्वचित् आपातमतिसुलभं "जीवानन्दनं न काव्यवैशिष्ट्यं किमप्यावहति" इत्यविचारितमेव नाटकमिदं मुधैवाधरयति[2] । कीत्नाम्नोऽस्यार्वाचीनस्य पण्डितस्य च दुर्गाप्रसादकाशीनाथयोः वचनमेव स्वयं प्रमाणमभवत् । 'गतानुगतिको लोको न लोकः पारमार्थिकः' इति कथमेष मृषा भवितुमर्हत्याभाणकः ।

अस्मिन् नाटके सामान्यतः शान्तिरस एवास्त्यादृतः । रूपकगुणपोषणाय तेषु तेषु संदर्भेषु यथोचितमपरेऽपि सन्त्यष्टावपि रसा समायो-

[1] द्रष्टव्यतां निर्णयसागरमुद्रितस्य जीवानन्दनस्यान्तिमपुटेऽधस्तात् मुद्रिता टिप्पणी । १८९१, १९३३ वत्सरयोः मुद्रिते पुस्तकद्वयेऽपि वाक्यमिदमपरिवर्तितमेव (समानं) दृश्यते ।

[2] द्रष्टव्यतां The Sanskrit Dramas नाम कीत्महाशयस्य पुस्तकम् । (Keith p. 253.)

जिताः । अतो नवरसभरितमिदं नाटकं गुणैरनवमं सर्वप्रकारैरिति विमर्श-पूर्वकम् आङ्गलभूमिकायां विषयो विपुलतया विचारितः । तत्रोपपादितान् विषयान् अवलोकयन्तः कृतधियो नाटकस्यास्योच्चैर्गुणान्, निर्णयसागर-कोशसंस्कारकयोः पण्डितयोर्दूषणवचनस्यार्थहीनत्वं च युगपदवधारयेयुः । विदग्धमतिरेष कविः कृतिं नाटकरूपामिमां तत्तत्स्थानानुगुण्येन स्वायोजितैः सहृदयहृदयावर्जकैः शृङ्गारादिनवरसाख्यैः गुणोज्ज्वलैर्नवमणिभिः साहित्य-वैद्य-वेदान्तार्थात्मकहेमसूत्रत्रयसंयोजनगुंभितैः स्वयमापादचूडं भूयसा भूषयति स्मेति, तथा ग्रथितमिमं ग्रन्थाख्यं रत्नहारं वाग्देव्याः कण्ठाभरणतामापादि-तवानिति च सुमतयः सोल्लेखं साधु परिशील्य, यत्सत्यम्, रसमस्य रूपकस्यास्वाद्य माद्येरन् । नाटकमिदं न केवलमर्थतो न वा केवलं रसतो नापि केवलं वर्णनानैपुण्यतः परं तु हृद्याभिः पद्यशैलीभिः, सुभगललिताभि-र्वाक्चरचनाभिः, अपरैश्च ग्रन्थसन्दर्भैः प्रशस्तत्वेन परिगणितेभ्यो रूपकान्त-रेभ्यो गुणतः कलयापि नैव हीयते । विदितवेदितव्यानामिदमेव महते खेदाय स्यात्, यदुत, तत्तत्प्रकरणानुरोधेन कैशिक्यारभटीभारतीसात्वती-नाम्नीर्वृत्तीरुपयुज्य संदृब्धानां पद्यानां हृद्यत्वमनादृत्य, तत्तत्पात्रस्य स्वा-भाविकमनोधर्माननुरुध्य प्रयुक्तानां क्वचित् सरससरलानां क्वचित् प्रौढानां क्वचिद्दीर्घसमासविशिष्टानां च विविधानां वाक्यशैलीनां गुणधर्मानवगणय्य, कथावस्तुनो यथार्थतः पौर्वापर्यसंघटनसंबन्धान् सम्यगविचार्य, स्थलेषु बहुषु शब्दार्थान् वाक्यार्थानपि यथावदनवधार्य च याथाकथाचत्वधिया सरसमिदं नाटकं विरसमिति विलिख्य, तौ संपादकौ अत्र दोषमाकल्पयामासतुः । तयोः पण्डितयोः ग्रन्थशोधनविषयेऽनवधानेन वा, अवज्ञया वा, अदक्षतया वा निर्णयसागरग्रन्थे समुपनतान् अपभ्रंशान् बहुविधान् यदि वयमिह न समुद्धाटयेम, तर्हि तत्कोशपाठकानां बहूनामापातचक्षुषां मनस्सु ताभ्यामुप-

कल्पितपूर्वा नाटकस्यास्यास्पृहणीया गुणहीनत्वरूपा दुर्वासना दोषबुद्धिश्च नैव परिमृज्येत; न वास्मदीयं ग्रन्थस्यास्य परिष्करणायादृतं परमदुर्भरं क्लेशमपि सर्वेऽप्यवगन्तुमभिनन्दितुं वा प्रभवेयुः ।

प्राथमिको नान्दीश्लोक एव प्रथममवलोक्यतां नाम । एष च 'लक्ष्मीकैरवबन्धुकल्पकतरून् लब्ध्वाथ लब्धेप्सिते' इति निर्णयसागरकोशे मुद्रित आस्ते । सामान्यव्युत्पन्नानामपि अत्र विद्यमाना वाक्यस्यासंगतता सम्यगवगमार्हा । लक्ष्म्याः चन्द्रस्य कल्पकतरोश्च लाभेनैव ईप्सितार्थलाभः संजात इति, अनन्तरमपि देवदानवगणः श्रमेण महता पुनरपि दुग्धाब्धिममन्थादिति च वाक्यस्यास्यार्थः । लक्ष्मीकैरवबन्धुकल्पकतरूणां प्राप्त्यैव यदीप्सितार्थलाभः संजातः, तर्हि तदनन्तरमपि को वा सचेताः पुनः समुद्रमथनात्मकमदभ्रं श्रममात्मना निरर्थकमङ्गीकुर्यात् । एतत्पाठानुरोधेन 'अथ' इति शब्दः, 'लब्धेप्सिते' इति शब्दश्च निरर्थकताम् उतापार्थतां विना न कमपि सुगममर्थमिहावबोधयतः । समुद्रमथनसमुद्यतानां सुरासुराणां सुधायाः समधिगमादृते नैव समीहितान्तरमासीत् । अमृतार्थमेव मथितत्वात् क्षीराब्धिमथनमेव बहुत्रामृतमथनमित्यपि व्यवह्रियते । अतो देवदानवानाम् अमृतलाभादृते न केनचिदप्यन्येन वस्तुना मनोरथपूर्तिरिति सुव्यक्ते वस्तुतत्त्वे, लक्ष्म्याद्यधिगमात् लब्धेप्सितत्वमिति वचनं स्थूलदृष्टयोऽप्यसंगतमिति ब्रुवीरन् । अतः 'लक्ष्मीकैरवबन्धुकल्पकतरून् लब्ध्वाथ लब्धेप्सिते' इति निर्णयसागरकोशस्थः पाठः सुतरामसंगतः । 'लक्ष्मीकैरवबन्धुकल्पकतरून् लब्ध्वाप्यलब्धेप्सिते' इति कोशेऽस्मिन् प्रदत्तः पाठ एव परिष्कृतः संगतश्च[1] । तत्कोशसंपादकयोः ग्रन्थशोधने परमानवधानताया अवज्ञतायाश्च सुस्पष्टद्योतकं दृष्टान्तान्तरमपि दृश्यतामिहोद्धृतम् । 'दृश्यतां

[1] मूलं व्याख्यानं च १, २ पुटयोः पश्यताम् अस्मित् पुस्तके ।

निर्णयसागरमुद्रितं कोशद्वयमपि[1]। तस्मिन् १४शे पुटे (द्वितीयमुद्रिते १७शे पुटे) जीवेन राज्ञा परमेश्वरस्य प्रभावातिशयेषु प्रस्तुतेषु, परमेश्वरी च, तस्या माहात्म्योपन्यसनपूर्वकं तेन प्रशंस्यते। अस्मिन् प्रकरणे 'एवमनिर्धारणीयनानास्वरूपा भगवतीपरमेतत्। परंतु भगवतो दयारूपैवेयम्' इति वचनपङ्क्तिरास्ते मुद्रिता। अत्र 'भगवतीपरमेतत्' इत्यस्य कोऽर्थः। यद्यत्र वस्तुत एवार्थबोधो न जायते, तदानीं कुतो नाम 'दयारूपैवेयम्' इति वाक्ये, 'सा खलु परमेश्वरी बहुविधदेवताशक्तिरूपावयवा' (पु. १५) इत्यादिषु अपरेषु च पूर्वोत्तरवाक्येषु विषयार्थपरामर्शनाय सावहिति सकृदपि न ताभ्यां दृष्टिः संचारिता। पूर्वोत्तरवाक्यानां पठनेन विषयसमन्वयः संपद्यत इति कुतश्च तत्त्वार्थावबोधने वा नैव मतिर्व्यापरिता। 'भगवतीपरमेतत्' इत्यपपाठस्य स्थाने 'भगवती परमेश्वरी' इति सुसंगतेन पदद्वयेन खलु भवितव्यम्; य एव हि नाम 'एवमनिर्धारणीयनानास्वरूपा भगवती परमेश्वरी' इति कविमुखोद्गतेनैवानन्तरिके वाक्ये विद्यमानेन 'भगवती परमेश्वरी' इति पदद्वयेन समञ्जसीक्रियमाणः सुसंगतमर्थं बोधयति। एते च एवंविधा अपरे च बहुसंख्याकाः प्रामादिका असंगताश्च निर्णयसागरकोशे दृश्यमाना दोषोत्करा अपपाठाश्च परिष्कृतैरेतत्कोशसुद्रितैः पाठैः सह संस्करणतारतम्यनिरूपणपट्टिकायाम् (Comparative Statement) अस्माभिः सज्जीकृतायां भूमिकानुबन्धत्वेन आयोजितायां सुव्यक्तसुद्धृत्य सन्ति निवेशिताः; यदवलोकनेन सकृत्, निर्णयसागरीयकोशः कियद्दोषभूयिष्ठ इति, तावद्दोषसंशोधनाय कियान् वा क्लेशः समभवदादृतोऽस्माभिरिति च गुणदोषविचारविचक्षणाः पाठकमहाशया एव यत्सत्यं ज्ञास्यन्ति।

[1] प्रथममुद्रणम् १८९१, द्वितीयं मुदणम् १९३३.

अपूर्वकथावस्तुसंघटितस्य वैद्यवेदान्तसाहित्याख्यशास्त्रीयविषयत्रय-शाखासंवेल्लितस्य बहुभिरपरिचितपूर्वस्य रूपकस्यैतस्य शोधनेन संस्करणेन पुनर्लेखनेन मुद्रणेन च केवलं न वयमाश्नुमहि कात्स्न्येन मानसीं तृप्तिम् । किंच विविधैः प्रकारैर्विलक्षणरूपस्यास्य रूपकस्य मूलग्रन्थपठनेन केवलं वैद्यास्तदितरे च गुणानस्य नाटकस्य प्रभवेयुरवगन्तुमिति च विचारितम-स्माभिः । आलोचितं च, यत् ते च ग्रन्थेऽस्मिन् स्थलेष्वनेकेषु दृश्यमानानां शास्त्रतत्त्वानां साहित्यगुणानां च याथातथ्यावगमे बुद्धिक्लेशमसहमाना नेम-मशेषतः पठितुमप्युद्युञ्जेरन्निति । एवं ग्रन्थस्यास्य गुणवैशिष्ट्यम्, एतत्पठि-तॄणामस्मिन् प्रवेशनैष्ठुर्यं च सुदूरमालोच्य, एतस्य मुद्रणकार्यारम्भसमकाल एव समुचितस्य व्याख्यानस्य लेखनमप्यावश्यकमिति निर्धार्य, तदपि विरचय्य पर्यपूरयाम । तामेनां नाम्ना नन्दिनीं नाम व्याख्यां यथावत् परिष्कृतेन मूलग्रन्थेन साकं सम्यक् मुद्रयित्वा, सहृदयजनसात्कर्तुमभिलषन्तः, तादृश-व्याख्यानसमलङ्कृतस्य नाटकस्यास्याविष्करणकर्मणा महता कालेन मनसि स्थितं मनोरथं सप्रमोदं सांप्रतं पूरयामः ।

नाटकानां व्याख्यानानि श्रव्यकाव्यव्याख्यानेभ्योऽपि स्वरूपतः प्रायेण भिन्नप्रकाराणि सन्ति । नाटकव्याख्यातरः सर्वेऽपि सामान्यतः तत्र तत्र क्लिष्टानामेव शब्दानामर्थविवरणम् , वाक्यविशेषाणां विशेषार्थविमर्शम् , नाटकसंबन्धिनां नानाविधानां लक्षणादीनां तत्तत्सन्दर्भेषु प्रमाणनिर्देशपूर्वकं निरूपणम् इत्येतदादीनि प्रदर्शयन्तीति प्रसिद्धमिदं संस्कृतसाहित्यप्रपञ्चे । न हि ते प्रतिपदार्थविवरणे प्रायेण स्वलेखिनीः प्रवर्तयन्तीति च सर्वे वयमवैमः । नाटकग्रन्थानां पठने ये श्रद्धामावहन्ति, ये च तदर्थं समुद्युञ्जते, तैः सांस्कृत्यां वाण्यां बहुधा व्युत्पन्नैरेव भाव्यमिति, अत एव पदशो वाक्यतश्चार्थनिरूपण-पूर्वकं विस्तरेण व्याख्याया उपपादनं तेषां नातीवावश्यकमिति च मत्वा, नाटक-व्याख्यातारः प्रायेण तथा विदधति । विलक्षणविषयसंघटितस्यास्य नाटकस्य

व्याख्यानलेखनप्रवृत्तानामस्माकं कार्यधुरा तु काममभवदन्यादृशी । निर्दिष्टपूर्वमेवास्माभिः, यत्किल सन्ति सुबहवस्तादृशा वैद्याः ये हि संस्कृतभाषायां साहित्यग्रामगमनिकायां चानुपलब्धपर्याप्तमतिप्रवृत्तयः ; सन्ति चापरे परश्शताः संशितसंस्कृतवाङ्मयानुभावाः ये हि नामापरिचितवैद्यशास्त्रपारिभाषिकसंप्रदायाः ; तेषामुभयेषामपि नाटकेऽस्मिन् नातिक्लेशेन प्रवृत्तिं प्रतीक्षमाणाः सविस्तरं तादृशीं व्याख्यां वयं प्राणैष्म, यया निर्दिष्टपूर्वयोः द्विविधपाठकवर्गयोरपि नाटकेऽस्मिन् युगपदभिरुचिः स्यात् संधुक्षिता । अतः पद्यानामशेषाणामपि, गद्यानां वाक्यानामपि भूयसा—ऋते सुतरां परिमितसंख्याकेभ्यः पदेभ्यो वाक्येभ्यश्च—पठितॄणामानुकूल्यमभिप्रेत्य, वयं प्रतिपदार्थविवृतिरूपां व्याख्यामतनिष्महि । न केवलं प्रतिपदार्थप्रदर्शनमेव कृतम् , अपि तु तत्र तत्र विषयाणां विशेषार्थविवरणे, तत्तत्सन्दर्भानुरोधेन ग्रन्थान्तरेभ्यः संगतानां प्रमाणानामुदाहरणपूर्वकं प्रदर्शने च निस्तन्द्रमेव यावच्छक्ति मतिरस्मदीया सर्वत्र व्यापारिता ।

विषयमिममेव सुव्यक्तमभिदध्महे—प्रौढानां प्रथितयशसां च प्राचां कवीनां हृदयङ्गमा वाक्परिपाटीः, रसपरिपोषेणाभिज्ञजनाभिनन्दनीयान् विश्रुतविपश्चितामपरेषामाशयविशेषांश्च कथमेष विदग्धः कविः स्वयमनुरुणद्धि सचमत्कारमिति तत्र तत्र प्रमाणोद्धरणपूर्वकं व्याख्यायां प्रपञ्चितमस्माभिः । अथ चैष विमर्शरूपेण कृतो विषयसंग्रहः । नाटकस्थाः सर्वेऽपि विषयाः पूर्वोत्तरानुपूर्वीपठनपूर्वकं सावापोद्वापं विमृश्य परिष्कृताः । निर्दिष्टपूर्वात् आन्ध्रलिपिकोशात् समुचिता उपपन्नाश्च पाठक्रमादयोऽत्रोपात्ता उपयुक्ताश्च । निर्णयसागरमुद्रालयमुद्रणेन नाटके व्याप्तं दोषबहुलत्वं नीरसत्वादिरूपं वैकल्यं चामूलाग्रतः प्रायो विमृष्टम् । यावच्छक्त्यधिगताः पाठभेदाश्च व्याख्यायां तत्र तत्र निरूपिताः । आयुर्वैदिकाः पारिभाषिका विषयाश्चा-

शेषतः सविस्तरं विवृताः। सामान्यव्युत्पत्तिमतामपि मूलग्रन्थनिरूपिता विषया यथा सुस्पष्टमवगतार्था भवेयुः तथा सर्वाण्यपि पद्यानि गद्यादीनि च व्याख्यया विशदीकृतानि। एवं सपरिष्कारं सुमहता क्लेशेनास्माभिः संस्कृत्य संपादितोऽयं ग्रन्थः, वीततन्द्रमशेषविषयविवरणानि विधाय प्रणीतेयं नन्दिनीव्याख्या च, विश्वसिमः, सहृदयानां भावुकमणीनां प्रकल्पेत हृदयावर्जनायेति। अस्य नाटकस्य कथाभागमप्यत्र संक्षिप्य पाठकेभ्य उपहरामः।

प्रथमाङ्के—जीवस्य मन्त्री विज्ञानशर्मा धारणां नाम स्त्रीपरिजनं प्रणिधित्वेन शत्रोर्यक्ष्मणः प्रवृत्तिं ज्ञातुं जीवराजाज्ञया प्रहिणोति। सा च नाम्ना गार्गीति स्वां तापसीत्वेन विडम्बयन्ती, शत्रुकटकं प्रविश्य, निभृतं रिपुवृत्तान्तमधिगत्य, प्रतिनिवृत्ता स्वात्मना ज्ञातं वृत्तान्तं मन्त्रिणे निवेदयति। प्राज्ञः सचिवश्च प्रबलजडतीक्ष्णप्रकृतीनां प्रकुपितानां वातपित्तकफानाम्, मानसिकदोषाणां कामादीनां च साहाय्यमधिगतवता राजयक्ष्मणा देहाख्यपुरस्य समुपनमत् प्रातिकूल्यं परिजिहीर्षुः स्वयं राज्ञः सविधं प्रयाति। रसगन्धकादिप्रयोगेणैव राजयक्ष्मा अभिभवनीय इति, तादृशौषधानां सिद्धिः प्राप्तिश्च शिवयोरुपासनयैव प्रकल्पेतेति च मन्त्री समालोच्य, राज्ञे स्वनिर्णयं निवेदयति। जीवराजश्च तथैव साम्बशिवोपासनायै पुण्डरीकपुरं प्रविशति। **द्वितीयाङ्के**—स्वस्मिन् किमपि अनिष्टं चेष्टितुं जीवः प्रयतत इति चारमुखादवगतवता यक्ष्मणा प्रहितस्तस्य चेटः कासस्तु यक्ष्मणो युवराजं पाण्डुं दिदृक्षुर्गच्छन्, मध्येमार्गं स्वजायां छर्दिं यदृच्छया पश्यति। तयोश्च नर्मसल्लापः प्रवेशके प्रवर्तते। अथ राजयक्ष्ममन्त्री पाण्डुः स्वशत्रोर्जीवस्य सकाशात् संकटः समुपनमेदिति श्रुत्वा, तत्प्रतीकाराय जीवराजविजयाय च समुचितानुपायान् स्वसेनानीभिः संनिपातप्रभृतिभिः, सैनिकैः कुष्ठोन्मादादिभिश्च साकं समालोचयति। कर्णमूलो नाम पाण्डोश्चारः स्वावगतं जीवस्य समाधिनिष्ठास्वरूपं रहसि पाण्डवे ज्ञापयति। पाण्डुश्च ततो जीवमन्त्रिणोः ज्ञानविज्ञानशर्मणोर्वैमनस्यमुपकल्प्य, जीवराजस्य प्रकृतिमण्डले संक्षोभमप्युत्पाद्य, जीवस्य सङ्कटोत्पादनायोपायांश्चिन्तयति। कासगलगण्डादयश्च तादृशोपजापकल्पनासु पाण्डुमनुसरन्ति। जीवराजपुरमभिव्याप्य तज्जयाय स्वान् रोगानीकान् पाण्डुश्चोदयति। **तृतीयाङ्के**—यक्ष्मणः प्रणिधिः

ह्रद्रोगो नाम गदो जीवराजपुरे रात्रौ संचरन् विचारनाम्ना नागरिकेणाधिकारपुरुषेण किङ्करेण चादसीयेन गृहीत्वा बध्यते। एतेषां च शुद्धविष्कम्भे सरसो हास्यबहुलश्च व्याहारः पारस्परिकः प्रवर्तते। स च विचारनामा नागरिको विज्ञानशर्मणा नगरगुप्त्यै नियोजितः पुरुषः। पाण्डुप्रेरिता विविधा रोगरूपा योधा जीवपुरस्यावस्कन्दनायोद्युञ्जते। एतस्मिन्नन्तरे जीवराजो लिप्सितं फलमुपलभ्य, प्रतीक्षितस्वागमनैः पौरैरलङ्कृतं पुरं प्रविशति। अत्र परमेश्वरप्रसादलब्धानां रसगन्धकादीनां प्रभावो विशिष्य वर्ण्यते। जीवराजश्च स्वानुष्ठितं शिवोपासनाप्रकारं निर्वर्णयति। निदिध्यासनेन साक्षात्कृतस्य परमेश्वरस्य स्वरूपमपि विशदीकरोति। परमेश्वराज्ञया चोषधीशो जीवाय दिव्या ओषधी रसादिसंस्काराय प्रयच्छति। मन्त्री च रसादींस्तान् शत्रुनिषूदनक्षमतया ओषधीभिः सह संयोजयति। **चतुर्थाङ्के**—यक्ष्मपक्षीयैरमित्रैः जीवराजस्योपरि कूटरचनया कृतं व्यतिक्रमं मन्त्री विज्ञानशर्मा श्रुत्वा, तं राज्ञे निवेदयतीति वृत्तं विदूषकस्योदरंभरेर्मुखेन कविः प्रकटयति। अत्रानवधानतया विदूषकस्य महानसप्रवेशः, आनुषङ्गिकतया तस्य दृष्टिगोचरं गतेषु विविधेषु भक्ष्यपेयादिषु समुत्पद्यमानमुत्कटलालसत्वम्, महानसे पौरोगवस्य विलक्षणस्थितिः इत्येवमादयो रसिकजनहासहेतवो वर्णनक्रमाः साधु कविना सन्ति संयोजिताः। ततो मध्यन्दिनवर्णनम्, राज्ञे सामन्तभूपैरुपायनोपहरणम्, जीवराजकृतशिवभक्तिस्मरणम्, श्रद्धास्मृतिप्रभृतिभी राज्ञः संलपनम्, जीवाय परमानन्ददानविषये शिवभक्तिकृतं प्रतिश्रववचनम्, मध्याह्नस्नानपूजाद्यनन्तरं देव्या बुद्धया सह राज्ञ आरामगमनम्, उद्यानस्य सर्वर्तुसमवायजनितसुषमाविशेषवर्णनम् इत्येते विषयाः पाठकान् कामम् आवर्जयेयुः। परमेश्वरप्रसादात् ऋतुषट्कस्य युगपदाविर्भूतस्य वैद्यशास्त्रानुरोधेन च वर्णनमिह साधु कविना निष्पादितम्। राज्ञो देव्या सह दोलाधिरोहणम्, सायंसन्ध्येत्यादयश्च सम्यगुपवर्ण्यन्ते। **पञ्चमाङ्के**—जीवराजः पशुपतिध्याननिष्ठायामास्ते। तद्ध्यानस्यान्तरायं कर्तुं पाण्डुः कामादीन् प्रणिधीन् जीवपुरं प्रति प्रहिणोति। तादृशचारेष्वन्यतमो मत्सरो जीवराजसेवकैर्गृहीतः परिभूतश्च विमुच्यते। स मत्सरो दुर्भरवैलक्ष्यखिन्नः प्रतिनिवर्तमानो मार्गमध्ये कुष्ठं यक्ष्मणः किङ्करमपरमप्यवलोकयति। अमीषां त्रयाणामपि तदा निर्वर्तमानः समागमसल्लपनादिव्यतिकरः सरसो हास्यरसकन्दलितश्च भवति।

जीवराजानुचरैः विचारादिभिः स्वस्य समुपनतं पराभवपरिभवादिकं मत्सरः कुष्ठादिभ्योऽभिदधाति। विचार्येमं परिभवं किंकर्तव्यमतःपरमिति पाण्डुकुष्ठावालोचयतः। ततः पाण्डुश्च जीवराजमपथ्येषु संधुक्षयितुम् अपथ्यतां नियोजयति। अथ राजयक्ष्मा पाण्डुमत्सराभ्यां विजने प्रासादे स्थित्वा मत्सरेणोपह्वरे प्रोक्तं स्वपरिपन्थिवृत्तं तत्कृतं परिभवं च शृणोति। जीवेन स्वपुरे यक्ष्मादिशत्रुनिबर्हणाय सज्जीकृतं यन्त्रशस्त्रादिसकलोपकरणविशिष्टं साधनं सर्वमपि मत्सरो निर्वर्णयति। यक्ष्मा च स्वनिषूदनाय विज्ञानशर्मविहितान् उद्यमानाकर्ण्य, स्वयमपि क्रोधसंधुक्षितः स्वशत्रुनिरसनाय विदधाति परिकरबन्धम्। **षष्ठाङ्के**—राजयक्ष्ममन्त्रिणा पाण्डुना नियुक्तै रोगानीकैः जीवराजस्य पुरमवस्कन्द्यते। पक्षद्वयेऽपि संमिलितै रोगात्मकैः औषधात्मकैश्च वीरभटैः निर्वर्त्यमानस्य तुमुलस्यायोधनस्य प्रेक्षणकुतूहलिनौ कर्मकालौ (तयोरधिदैवते) नभसि निभृतं स्थित्वा युद्धस्वरूपं वर्णयतः। एतन्मध्ये आपवर्गिकसचिवो ज्ञानशर्मा जीवराजमुपसृत्य त्रैवर्गिककृत्येभ्यो निवर्त्य जीवमपवर्गश्रेयस्साधनायोपांशु संधुक्षयति। अतः संसृतौ भौतिके देहे च तात्कालिकी विरक्तिर्जीवस्य जायते। अथ विज्ञानशर्मा राज्ञः सविधमागत्य, तस्याज्ञसा समुपनतं गुणवैपरीत्यमवलोकयति। तमेनं ज्ञानशर्मकृतं गुणविवर्तमवगत्य, विज्ञानशर्मा स्वपक्षस्यावश्यंभाविनीं जयश्रियं राज्ञे सम्यगवबोध्य, तं बहुभिरुपायैः प्रकृतिमानयति। एतदन्तरा पाण्डुप्रेरितेन भस्मकरोगेण जीवराजोऽभिभूयते। राज्ञस्तदिदमवस्थान्तरम् औदरिको विदूषकः स्वोदरपोषणायोपयोक्तुमुद्युङ्क्ते। विदिततद्व्यतिकरो विज्ञानशर्मा तु राजानं प्रासादोपरि नीत्वा, तस्य मनोवृत्तिं वैरिकृतपराभियोगव्यतिकरे विनिवर्त्य बहुबुभुक्षां विस्मारयति। जीवपक्षराजयक्ष्मपक्षयोरत्युग्रो विग्रहक्रमः कालकर्मभ्यां वर्ण्यते। अतिप्रबलैः वसन्तकुसुमाकराद्यौषधात्मकैः सेनानीभिः बलवन्तो व्याधिरूपा योधा रणाङ्गणे निपात्यन्ते। विषण्णहृदयो राजयक्ष्मा पुनरपि मत्सरोपजापेन जीवपुरमभियोक्तुम्, कूटयुद्धं कर्तुमपि निश्चित्य, विषूचिमत्सराभ्यां सह निष्क्रामति। **सप्तमाङ्के**—अन्ततः केषुचनावशिष्टेषु च रोगेषु भेषजान्तरैरभिहतेषु, जीवराजश्चन्द्रशेखरस्यासाधारणानुग्रहबलेन सकुटुम्बं राजयक्ष्माणमप्यभिहन्ति। ततः साक्षात् परमेश्वरः परमेश्वर्या समेतः प्रमथगणपरिवृतो जीवराजस्य सान्निध्यं दत्त्वा, तस्मै योगशक्तिमुपदिश्य, जीवन्मुक्तिपर्यन्तानि श्रेयांसि चानुगृह्णाति।

एवं सर्वानिष्टप्रदानां रोगादिरूपदुष्टानां निग्रहं विधाय, इष्टस्य शिष्टस्य च जीवस्य शाश्वतमानन्दं शाङ्करी भक्तिरुपपादयति। **एष पुनः कथावस्तुनः सारसङ्ग्रहः**—

जीवात्मा नाटकेऽस्मिन् भवति नरपतिर्नायकश्चास्य पत्नी
बुद्धिर्विज्ञानशर्मा भवति सुसचिवः पत्तनं मर्त्यदेहः।
श्रद्धा भक्तिश्च शैवी स्मृतिरपि सततं धारणा सत्त्वयुक्ता
प्राध्वं राजानमन्वेत्यथ भयमुपयात्यस्य यक्ष्माख्यशत्रोः॥

यक्ष्माणं तं विषूची स्वयमनुविदधे गेहिनी यस्य पाण्डु-
र्मन्त्री तद्यौवराज्येऽप्यधिकृतपुरुषः सज्वरश्चातिसारः।
ग्रन्थ्युन्मादप्रमेहप्रभृतिगदगणाश्चापरे यक्ष्मपक्षे
स्थित्वा जीवस्य राज्ञः पुरमनवरतं क्लेशयन्ति प्रसह्य॥

विज्ञानमन्त्रिबलतः शिवयोश्च भक्त्या
योगैश्च जीवनृपतिः समवाप्य सिद्धिम्।
सिद्धौषधानि च तयोर्दययाधिगत्य
निर्धूतवैरिनिवहः सुखमश्नुतेऽन्ते॥

अथ ग्रन्थस्यास्य मुद्रणाविष्करणयोः प्रवृत्तिप्रस्तावेन भूमिकामिमामुपसंहरामः। नाटकमूलग्रन्थस्यास्य नानाप्रकारेण संस्करणकर्मणि सति विर्वर्तिते, विमर्शपूर्वकं व्याख्यानेऽपि विस्तरतो विलिख्य परिसमापिते, कथमेष ग्रन्थः सहृदयानां चक्षुर्गोचरो भुवि भविष्यतीति कदाचित् वयं स्म भवामः शङ्काकुलमानसाः। आर्जितप्रज्ञानाम्, अथाप्याशाभङ्गविधुराणां विदुषां दौर्मनस्यं 'जीर्णमङ्गे सुभाषितम्' इति यथावत् नीतिज्ञो भर्तृहरिः साधु समाख्यापयदिति स्मरन् निर्वेदमपि पूर्वं सकृदाश्नुमहि। गच्छता गणरात्रेण ग्लास्नुभिः मर्त्यधर्मभिरस्माभिः सह ग्रन्थोऽयं कथितपूर्वाभाणकानुरोधेन किमु नामाभावतामुपलभेतेति च सुदूरं चिन्तापथमारूढा चित्तवृत्तिरस्माकम्। अथैकदा नः सुहृद्भिः वैद्यरत्नैः श्रीनिवासमूर्तिमहाशयैः अडयारग्रन्थालयाधि-

कृतैः सह विद्याविषयकसंकथायां संप्रवृत्तायां प्रासंगिकतया जीवानन्दननाटक-संबन्धिनी वार्तापि स्थानमुपलेभे। स एवाभवच्छुभंयुः समयः, यदास्य नाटक-स्यास्मच्छोधितस्य नन्दिनीव्याख्यासहितस्य अडयार्पुस्तकालयद्वारा मुद्रण-माविष्करणं चावाभ्यामभवन्निर्णीतम्। दिनैः कतिपयैरेवच ततो मुद्रणमस्या-रब्धम्। बहोश्चिरात्, जगन्महासमरसमारम्भात् प्रागेवोपक्रान्तेऽप्यस्मिन् मुद्रणकर्मणि, कालेन द्राघीयसा, कथमप्यामन्दमन्द्रया गजगमनिकया ग्रन्थ-स्यास्य मुद्रणक्रिया कथंचित् स्वकीयाया अवसानसीमां संप्रति समासीदति-स्म; वयमपि सुदीर्घमिदानीमुच्छ्वसिमः। अस्य बहुतिथस्य कालातिपातस्य नास्मदीयात्र दीर्घसूत्रता, न वा मुद्रालयस्य कर्मनिर्वर्तने मन्थरता मना-गप्यपराध्यति; परं तु पदे पदे मुद्रणालये तथा अडयार्पुस्तककोशा-गारे च समुपचितो ग्रन्थाविष्करणक्रियाकलाप एव कालविलम्बस्य प्रधानं कारणमासीदिति वयमिदानीमावेदयामः। स्वसामाजिकग्रन्थालयसंबन्धिनम् आत्मनोऽधिकारं यथाविध्युपयुज्य, संस्कृतसारस्वताभिवृद्धौ आविष्कृता-दरातिशयाय अस्मत्सुहृदे वैद्यरत्न-श्रीनिवासमूर्तिमहाभागाय शिशिरशिशिरेण मनसा वयमात्मानं धारयामः। अस्मदीयैः व्याख्यानादिभिः सुतरां स्वरूपतो गुणतश्चोपबृंहितस्यास्य नाटकस्य महतः, ग्रन्थान्तराणामीदृशानामपि मनोहरमुद्रणकर्मणा गैर्वाण्या वाण्याः प्रचारविषये प्रशस्तां सेवामाचरद्भ्यो वसन्तमुद्रायन्त्रालयकार्यनिर्वाहकेभ्यश्च सन्त्वस्माकमिमे धन्यवादाः।

विविधैरभिनवैः परिष्कारविशेषैः समन्वितोऽयं नाटकग्रन्थः सुतरा-मपूर्ववस्तुघटितकथांशेन, अनवद्यया पद्यगद्यादिशैल्या, सरसया वर्णनपरिपा-ट्या, वैद्यशास्त्रतत्त्वानां विवरणप्रकारेण, विविधवेदान्तार्थरहस्यबोधनविधानेन, काव्योज्जीवकशृङ्गारादिनानारसोपबृंहणेन च, मन्महे, मध्यस्थदृशाम् अधु-नातनानाम् उन्मिषत्प्रतिभाशालिनां मनीषिणाम् अभिनन्दनाय प्रकल्पेतेति।

एवं सकलगुणसंपन्नमिमं विधित्सुभिर्ग्रन्थमाद्दतेऽप्यस्माभिर्महति समुद्यमे, मनुष्यधर्मणां सहजेन कादाचित्केन प्रमादेन यदि कतिचन स्खलनदोषाः—येषां च धूर्वहत्वमस्मदायत्तम्—दोषज्ञदृष्टिगोचरा भवन्ति, तर्हि ते विमर्शक्रियाश्रद्धालुभिः संख्यावद्भिः प्रेमार्द्रहृदयैरस्मभ्यमावेदनीया इति निवेदयामः ।

आर्यगृहम्,
वेपेरि—मदरास्

मे. दुरैस्वामि अय्यंगार् ।

॥ भूमिकानुबन्धः ॥

। व्याख्यातृकृतशोधनानि पाठभेदाश्च ।

अत्र अतिलघीयांसः पाठभेदादयो नोद्धृताः ।

कुण्डलीकरणानामन्तरा दत्ताः संख्याङ्काः तत्तद्ग्रन्थस्य पृष्ठाङ्कान् पङ्क्तयङ्कांश्च क्रमेण सूचयन्ति । * अनेन चिह्नेन तारकिताः पङ्क्तयो विशिष्य ग्रन्थे सावहिति पठनीयाः ।

निर्णयसागरकोशपाठाः । † **एतत्कोशपाठाः ।**

प्रथमाङ्के

*लब्ध्वाथ लब्धेप्सिते (१-५)	लब्ध्वाप्यलब्धेप्सिते (१-४)
तनुभृतां (१-१०)	तनुभृता (३-२)
दिगन्ते (१-२१)	दिगन्तान् (६-१)
नाटकमिति । (२-१०)	नाटकम् । (७-६)
*त्वं न जानासि (३-१)	तत्त्वं न जानासि (११-४)
*पद्मसंभृतकर (३-१४)	पद्मसंभवकर (१३-५)
*भूमिपरिग्रहाय (३-२४)	भूमिकापरिग्रहाय (१५-१)
प्रौढामात्यनिरुक्त (५-१७)	प्रौढामात्यनियुक्त (२१-२)
दुर्जयो युष्माभिः । (९-१२)	दुर्जयो यक्ष्मा युष्माभिः । (३३-१)
*रसं प्रतिपन्नधैर्या । (९-१८)	न संप्रतिपन्नधैर्या । (३३-७)
*अज्ञानशर्मा (११-१२)	ज्ञानशर्मा (४०-१)

† Here the book Jīvānandanam, 1891 edition (Kāvyamala Series) of Nirnaya Sāgar Press is referred. Their 2nd edition of 1933 also carries the same inaccurate readings etc.

*जाग्रतिः फलकर्मैव । (?) (११-१३)	जाग्रति मयि स निष्फलकर्मैव । (४०-२)
*यमुनाभ्रान्तबाह्वन्तर (१३-२३)	यमुनाभ्रातृबाह्वन्तर (४८-२)
*मन्दरमन्थानदण्डैः (१४-४)	मन्दरमन्थानदण्डेन (४९-२)
*नानास्वरूपा भगवती परमेतत्।(१४-२२)	नानास्वरूपा भगवती परमेश्वरी । (५२-६)
उपासनीयावेतौ । (१५-२७)	उपासनीया एते । (५९-४)

द्वितीयाङ्के

विभ्रममूल्यमनुपयुज्य मां (१७-२०)	विभ्रममूल्यमनुयुञ्जाना (६९-१)
*संधास्येत्यवतीं (?) तु (२०-१४)	संधास्ये भवतीं तु (७९-३)
*हिक्काः सुखीकृत्य (२१-१, २)	हिक्का मुखीकृत्य (७९-४, ५)
*मद्बुद्धयैव (२१-६)	मद्बुद्धयैव (८०-५)
*दारुणमाननबिम्बं (२१-२१)	दारुणमाननविवरं (८२-७)
(गलगण्डो निष्क्रम्य (२१-२५)	गलगण्डः—तथा।(इति निष्क्रम्य . . . . .) (८३-३)
अर्शोभेदाः षडतिधृतयः (२२-२५)	अर्शोभेदाः षडतिगतयः (८७-३)
प्रणम्य प्राञ्जलयस्तिष्ठन्ति । (२३-३)	प्रणम्योत्थाय प्राञ्जलयस्तिष्ठन्ति । (८८-३)
सर्वे सैनिकास्तिष्ठन्तु । (२३-१०)	कुमार, सर्वे सैनिकास्तिष्ठन्तु । (८९-६)
*घनसरण्यतीतं द्रुम (२३-१९)	घनसरण्यतीतद्रुम (९२-३)
*गन्तुं शयितुमशितुं यातुं (२४-१)	गन्तुं शयितुमशितुं पातुं (९३-५)
तत्क्रियतामस्मदुक्तिश्रवणादरः। (२४-४)	तत् कर्तव्ये किञ्चिदस्मद्वचांसि कर्णयोरतिथी-कर्तुमर्हति भवान् । (९४-२)
संप्रस्रावात्परिणतिं (२४-७)	प्रस्रावाख्यां परिणतिं (९५-२)
न यावत्स हितः (२४-१३)	न यावत् सहितः (९६-३)
*कुष्ठेष्वेकः—(स्वगतम् ।) (२५-१४)	कुष्ठेष्वेकः—स्वामिन्, (१०१-६)
*तव गमनागमनं च । (२६-१७)	तव गमनमागमनं च । (१०६-४)
*प्रान्त(?) स्तदादीयतां (२७-९)	प्रातस्तदा दीयतां (१०९-५)
*शोषण इव तस्य (?) तव किं (२८-४)	शोषणे वा तस्य किं न (११३-४)
हितकारिराज्ञः (२८-२३)	हितकारि राज्ञः (११७-५)
*एवमेवम् । (३०-४)	एवमिव । (१२३-६)
*यदि सत्यं गदोऽसि (३०-२०)	यदि सत्यं गदसि (१२५-५)

तृतीयाङ्के

नागरिकेण संयमितः । (३०-२६)

*तैरन्नाद्युपपाद्य धूर्जटिमुखान् देवान्निवेद्या-
तिथीन्संतर्प्याश्नत एव याति दिवसः
शेषः कुतः संचरः । (३१-७, ८)
नोंकारः पुवते (३१-१४)
भक्ताः पञ्चजनाः (३१-१७)
'सर्वमिदं राजकार्यं त्वया कस्मैचिदपि न
कथनीयम्' इति (३२-१५)
*दलद्दशमितो रागमर्कक्रमेण । (३२-२४)
व्याप्तृते मया (३४-१३)
*लोचने चाधिचत्वा (३५-१)
(सामर्षं सावहित्थं चाकाशे) (३५-६)

धौरेयस्खलितानि (३५-११)
*समद्युत (?) प्राणनिरोधेन (३७-१)
समाराधितयोः (३७-२)
नीरोगीकरणसमर्थान् (३७-९)
*वक्त्रेन्दो रुचिरेण नाभितिलक(३७-१७)
*द्विजहंसापाय (३८-२०)
*प्रियरतीनां युवतीनामनभिमतानां पुंसां
जरामुपरुध्य . . . भवति। (३९-३,४)
ततस्तेन दीयमानान् (४०-११)
अतः सर्वास्ताः (४०-१७)
संनिहितः । अतः । (४०-१८)
*ततश्च भगवदाज्ञया तेन सोमेन सर्वास्ता
मह्यं दत्ताः। (इति मन्त्रिहस्तेऽर्पयति।)
(४०-२१)

नागरिकेण झटिति गृहीत्वा बध्वा च विकृष्टो-
ऽस्मि । (१२७-१)
तैरन्नान्युपपाद्य पञ्च च महायज्ञान् विधायाश्नति
श्रीकण्ठाय निवेद्य मध्यतिथये दत्वा च
गच्छत्यहः । (१२७-११, १२)
नोंकारः पवते (१२९-२)
भुक्ता पञ्चजनाः (१२९-५)
'श्रुतमिहत्यं राजकार्यं कस्मैचिदपि न कथय'
इति (१३२-२)
दलद्दशमितो रागमर्कः करेण । (१३२-११)
व्याप्तृतेन मया (१४१-१)
लोचने षट् च रोगाः (१४३-५)
(सामर्षं सावहित्थं चाकाशे लक्ष्यं बध्वा)
(१४४-२)
धौरेये स्खलितानि (१४५-३)
अस्मत्कृतप्राणनिरोधेन (१५३-१)
समाधिना समाराधितयोः (१५३-२)
देहस्य नीरोगीकरणसमर्थान् (१५५-१)
वक्त्रेन्दौ रुचिरैणनाभितिलक (१५६-६)
द्विजहिंसापाप (१६३-१)
प्रियरतीनां युवतीनाम् अनभिमतां जरामुप-
रुध्य . . . क्रियते । (१६५-१, २)
ततस्तेन साम्बशिवेन दीयमानान् (१७०-१)
अतः स्वामिन्, सर्वास्ताः (१७१-१)
सन्निहितः । अतः श्रीपरमेश्वर, (१७१-२)
ततः स च महौषधीशः परमेश्वरानुज्ञया सर्वा
एता दिव्या ओषधीर्दत्तवान्। यदर्थं प्रेषि-
तोऽहं भवता तदेतान् रसगन्धकान् ओष-
धीभिः सह गृहाण । (इति मन्त्रिहस्तेऽर्प-
यति ।) (१७२-१, २, ३)

चतुर्थाङ्के

*स्नातव्यं जपितव्यं वसितव्यं नमसितव्य-मत्तव्यम् । अ . . . . . मनुकूलं दैवत-मत्र क्रमेण मया ॥ (४५-२२, २३)	स्नातव्यं वसितव्यं जपितव्यं नमसितव्यमत्त-व्यम् । अप्स्वंशुकमनुकूलं दैवतमन्नं क्रमेण मया ॥ (१८९-२, ३)
आसन्नां . . . . . वारण (४६-१४)	आसन्नां निबिरीसवारण (१९१-३)
आणवेदु महाराओ । (४८-१९)	आणवेदु महाराओ । अहं पस्स एव्व चिट्ठम्मि । (१९६-१२)
तटिल्लताविन्यासं (४९-११)	तटिल्लताविभ्रमं (१९९-२)
*भजती चेलाञ्चलेन (४९-१४)	मृजती चेलाञ्चलेन (१९९-५)
*स्नातुं च भोक्तुमथितुं (५०-५)	स्नातुं च भक्तमशितुं (२०१-४)
*शालिनस्तृप्तिः । (५०-८)	शाखिनस्तृप्तिः । (२०२-२)
न तु यथा (५१-४)	ननु यथा (२०५-४)
संदर्भ्य गुणान् (५१-१५)	संदर्श्य गुणान् (२०७-१)
भवतु । अतस्तस्मिन् (५१-१७)	भवतु । स खलु परमेश्वरस्यैवांशः । अतस्त-स्मिन् (२०८-१)
*ता एहि तं जेव्व अणुग्गहीदुम् (५२-१,२)	ता एहि तं जेव्व अणुग्गहीदुम् । (इति मार्ग-मुपदिशति ।) इदो इदो भअवदी । (२१०-१)
राजा—अहो अमृतासारमयः (५२-३)	राजा—(श्रुत्वा) अहो, अमृतासारमयः (२१०-४)
*प्रवहन्ती तु इति पद्यस्यानन्तरं 'इयत्कृतम् केन' इति पद्यम् अस्मिन् कोशे नास्ति । (५२-१९)	प्रवहन्ती तु इति पद्यस्यानन्तरम् 'इयत्कृतं केन' इति (श्लो. २३) पद्यम् अत्र विद्यमानं पठ्यताम् । (२१३-१, २)
*नीरुजमुरु सुस्थं (५२-२३)	नीरुजपुरसुस्थं (२१४-४)
*भक्तिः—तथा भवतु ।(इति निष्क्रान्ता ।) (५३-६)	भक्तिश्रद्धे—विजयी भव ।(इति निष्क्रान्ते ।) (२१६-२)
भूमौ साधु वितत्य (५३-१७)	पृथ्वायामि वितत्य (२१७-१०)
घृतपक्वफाणितमथापूपैः (५३-१८)	घृतपक्वफाणितमयापूपैः (२१७-३)
देवानभ्यर्च्य भक्तया (५४-५)	देवानभ्यर्च्य भुक्त्वा (२१८-१०)
सौरभ्योच्छ्वायलभ्य (५४-१५)	सौरभ्याघ्राणलभ्य (२२०-६)

*सुदृशोऽल्पवीर्याः । वीर्यं प्रसन्नं (५५-२२, ५६-१)	तरुणाल्पवीर्याः । वार्यप्रसन्नं (२२७-६, ७)
*स्नेहाद्विदग्धात् (५६-१३)	स्नेहाद्विदिग्धात् (२३१-२)
नक्तमहह (५७-७)	नक्तमहनि (२३७-१)
राजा—वयस्य, (५८-१)	राजा—(विहस्य) वयस्य, (२४०-४)
*धरणीए विअ मह धरणीए अनक्खराए वाआए वि मह अत्थबोधो होइ। [धरण्या इव मम गृहिण्या अनक्षराया वाचाया अपि ममार्थबोधो भवति ।] (५८-१५, १६, २६, २७)	वाणरीए विअ मह घरिणीए वि अणक्खरा एव्व वाआ । ताए वि मह अत्थबोहो होइ । [वानर्या इव मम गृहिण्या अपि अनक्षरैव वाक् । तस्या अपि ममार्थबोधो भवति ।] (२४२-२, ३, ४, ५)
अहमप्यन्तःपुरमेव गच्छामि । (५९-१४)	अहमप्यन्तःपुरमेव गच्छामि । दौवारिक पुरतो मार्गमादर्शय । (२४४-३)

पञ्चमाङ्कः

*द्वावपि पुरुषौ (६०-१४)	द्वाविव पुरुषौ (२५१-१)
*माशब्दकीयमवस्था (६१-५)	अशाब्दिकीयमवस्था (२५४-३)
गङ्गाचन्द्रादिपरिकरं विना (६१-१२)	यत इदानीं गङ्गाचन्द्रादिपरिकरं विनापि (२५५-२)
(प्रकाशम् ।) तस्यैवेयं दशा (६२-२)	(प्रकाशम्) सखे, तस्यैवेयं दशा (२५७-३)
कथं गृहीता भवता कापालिकतापिशाचिका । (६२-५)	कथं गृहीतवती भवन्तमपि कापालिकतापिशाची । (२५७-६)
कथं तद्दुर्दशा परम् । (६२-१०)	कथं ते दुर्दशापदम् । (२५८-४)
*आस्थानाय स्वहस्तदानमिदम् । (६२-२७)	उत्थानाय स्वहस्तदानमिदम् । (२६०-८)
*सखे, तवाप्यकथनीयं नाम किमस्ति । श्रूयताम्। विज्ञानप्रहितेन . . (६३-२)	सखे, तवाप्यकथनीयं नाम किमस्ति । श्रूयताम् ।
	कुष्ठः—कथय कथय ।
	मत्सरः—विज्ञानप्रहितेन . . . (२६१-२,४)
दृढया भक्त्या प्रसादात्स्थितम् । (६३-६)	दृढया भक्त्याऽऽप्रसादात् स्थितम् । (२६१-८)

भवान्यदेव (६३-१७)	भवान् यदेव (२६३-७)
*तप्स्यमानस्तपः (६५-७)	तप्स्यमानं तपः (२६९-३)
आर्य कटकसीमनि देवः प्राप्त इति (६६-१५)	आर्य, इयमपथ्यता । कटकसीमनि देवः प्राप्त इति (२७४-१)

*† निर्णयसागरकोशे ६७-पुटात् प्रभृति यावत्पञ्चमाङ्कपर्यवसानं (पुट ७०) राजयक्ष्मा इति पदं **राजा** इति व्यपदिष्टेन आधिकारिकनाम्ना स्थूलाक्षरैः अविचारितमेव मुद्रितमास्ते । नाटकेषु नियमेन कथानायकभूतो नृप एव राजनाम्ना व्यपदिश्यते । अस्मिन्नाटके जीवराज एव सर्वत्र राजपदवाच्यः † । **राजयक्ष्मा**—इति निर्देशः समुचितः । दृश्यताम् एष कोशः । (२७५-२९२ पुटाः ।)

*श्रुतं कुष्ठमुखात्पुरवृत्तं तं विशेषतः श्रोतुमिच्छामि । (६७-११)	श्रुतः कुष्ठमुखादेव । विशेषतः श्रोतुमिच्छामि । (२७७-१)
मत्सरः—संनद्धैः पुररक्षणे (६७-१४)	**मत्सरः**—श्रूयताम् । संनद्धैः पुररक्षणे (२७७-४)
*तत्तद्देशगतैश्च यन्त्रनिचयैः (६७-१६)	तत्तद्देशगतैश्च यन्त्रनिचयैः (२७७-६)
*तानि यन्त्राणि कीदृशानीति सप्रकारम् (६७-२०)	तानि यन्त्राणि कीदृशानीति च सकलमपि सप्रकारं (२७८-७)
*समानाख्यो गुल्फे, (६७-२५)	समानाख्यो गुल्मे (२७८-७)
*एकान्येकमुखान्यपि (६८-२२)	एकानेकमुखान्यपि (२८४-४)
कः कोऽत्र भोः, शस्त्रम् । (७०-६)	कः कोऽत्र भोः । शस्त्रं शस्त्रम् । (२९१-१)
***पाण्डुः**—ननु संनिहितमेव शस्त्रम् । तथापि किंचिद्विज्ञापयामि । अस्त्येवायमन्तिमः प्रकारः । अपि तु (७०-८, ९)	**पाण्डुः**—ननु संनिहितमेव शस्त्रम् । तथापि देव, किञ्चिद्विज्ञापयामि । **राजयक्ष्मा**—श्रोतव्यं तर्हि । **पाण्डुः**—अस्त्येवायमन्तिमः प्रकारः । अपि तु, (२९१-२, ३, ४)
राजा—भवतु तथा । अस्त्येवैतदनन्तरकर्तव्यम् । (७०-१४)	**राजयक्ष्मा**—भवतु तथा । अस्त्येवैतदनन्तरकर्तव्यं विस्फूर्जितम् । (२९२-३)

† दृश्यतां पारिपार्श्वकवाक्यं प्रस्तावनायाम्—'कथानायकस्य जीवस्य' इति तत्र ग्रन्थकर्तुः प्रयोगो विद्यते । P. १५. तथा सर्वत्र जीव एव राजेति ग्रन्थे व्यवह्रियते ।

षष्ठाङ्के

प्रतियुधा (७०-२३)	प्रतियुध्य (२९३-३)
सरसतत्प्रतिभटजातं (७०-२३, २४)	सरसं तत्प्रतिभटजातं (२९३-४)
*त्वामज्ञातमनुग्रहाय (७१-१)	त्वामाज्ञातमनुग्रहाय (२९५-१)
भवत्तनूभृत्त्वयने (७१-१८)	भवत्तनू ऋत्वयने (२९९-४)
ज्ञानशर्मणोपजापः (७२-१)	ज्ञानशर्मण उपजापः (३०२-५)
आयान्तमवलोक्य (७२-७)	तमायान्तमवलोक्य (३०३-१)
निर्मर्यादमुपैत्यमानिव (७२-१३)	निर्मर्यादमुदेत्यमानिव (३०४-२)
वचोऽप्रियमपि स्वेष्टं (७२-२५)	वचोऽप्रियमपि स्पष्टं (३०६-३)
*त्वग्रोमकूपं (७३-१३)	त्वग्रोमरूपं (३०८-४)
*न नः परमिह (७४-४)	नेतःपरमिह (३१२-४)
*पत्त्रनिचय (७४-१९)	यन्त्रनिचय (३१४-२)
कुटिलैः प्रवृत्त्या (७४-२६)	कुटिलैः प्रकृत्या (३१५-४)
निजवशंवदसेवकेन (७५-१)	निजवशंवदसैनिकेन (३१६-१)
समञ्जसयुक्तिकं वचोऽब्रवीत् । (७५-६)	विज्ञानशर्मा समञ्जसयुक्तिकं वचनमुदीरयामास । (३१७-२,३)
जानातु भगवान् (७५-१४)	जानातु स भवान् (३१९-२)
इयतापि कालेन पुरस्य स्वायत्तत्वे (७५-१७)	नियतेऽपि कालेन पुरस्य स्वायत्तत्वे (३१९-५)
समरयत्नकृतत्वरः (७६-१२)	समरचत्वरकृतत्वरः (३२३-४)
यदेवं देवस्य मनसो व्याकुलीभावः (७६-१६)	य एवं देवस्य मनसो व्याकुलीभावः (३२४-२)
*'मोक्षे धीः' इत्यस्य (श्लो. २९) अनन्तरं 'श्रुतिश्च भवति . . . .' इति वाक्यं नात्र विद्यते । (७६-२२)	श्रुतिश्च भवति—"दूरमेते विपरीते विषूची अविद्या या च विद्येति विज्ञाता" इति । (३२५-१,२)
चेद्दुग्धाम्बुधिः (७७-२४)	मे दुग्धाम्बुधिः (३३०-३)
वत्स, श्रुतं भवता । (७८-६)	वत्स, श्रुतं भवता राज्ञो विदूषकस्य वचनम् । (३३२-२)
राजा—वयस्य, (७८-१२)	राजा—(विहस्य) वयस्य, (३३३-१)

*औपाधिकी राज्ञो बुभुक्षा । (७९-१)	औपाधिकी राज्ञो बहुबुभुक्षा । (३३३-९)
अलमिदम् । अन्यदप्यचिन्तनीयं बुद्धि-विलसितमिति (७९-१७)	अत्यल्पमिदम् । अन्यदप्यचिन्तनीयं त्वद्धि-लसितमिति (३३६-२)
*विदूषको ब्रवीति । (८१-२१)	विदूषको बिभेति । (३४४-६)
*स्वेद्यानि सप्त च (८३-१८)	खेद्यानि सप्त च (३५१-७)
परिखात्वेन निरूपिताः । (८५-१)	सप्त धातवः परिखात्वेन निरूपिताः । (३५५-३)
*यतन्तु नाम । (८५-५)	यतन्तां नाम । (३५६-४)
*श्लेष्मप्रभृतीन्रक्तपुत्रान् (८५-१९)	श्लेष्मप्रभृतीन् सपुत्रान् (३५८-९)
*अमृतगुग्गुलुच (तृ?)णपञ्चकादयः (८५-२१)	अमृतागुग्गुलुलवणपञ्चकादयः (३५९-२)
*अध्यस्मत्कुलपक्षपातिनि पथा कामोपभोग (८७-५)	अध्यस्मत्कुलपक्षपातिनि यथाकामोपभोग (३६५-४)
*मन्दाग्निवातकफपित्ताः—(८७-१७)	मन्दाग्निवातपित्तकफाः—(३६७-६)
दास्या विलसितं (८८-१८)	दास्या दुर्विलसितं (३७१-१)
जृम्भयति सप्तिविघूर्णं (८९-२४)	जृम्भयति दृष्टिविघूर्णं (३७५-४)
*संपदं एसो अत्ताणं वि ण जाणादि राजकज्जं कुदो उण । उम्मादं वा उवजावं वा सत्तुकिदम् । [सांप्रतमेष आत्मानमपि न जानाति राजकार्यं कुतःपुनरुन्मादं वा उपजापं वा शत्रुकृतम् ।] (९३-१, २, २५, २६)	संपदं एसो—[सांप्रतमेषः]—अत्ताणं वि ण जाणाइ राजकज्जं कुदो उण । उम्मादो उवजावो वा एदस्सिं सत्तुहिं किदो ॥ [आत्मानमपि न जानाति राजकार्यं कुतः पुनः । उन्माद उपजापो वा एतस्मिन् शत्रुभिः कृतः ॥] (३९२-१, २, ४, ५)
तत्क्षमां भूमिमेव (९४-३)	समरक्षमां भूमिमेव (३९८-१)
*प्रबलमग्निमान्द्यारुचिम् । (९४-१८)	प्रबलमग्निमान्द्यार्णवम् । (४०२-४)
*घनारवमन्दहासम् । (९५-१२)	घनारवमट्टहासम् । (४०८.२)
*'कर्तुमुचितमिति प्रतिभाति' इति वाक्यस्य (१९ पङ्क्तिः) अनन्तरं यक्ष्ममत्सरयोः उक्तिप्रत्युक्तिरूपं सुतरां प्रधानं वाक्यद्वयं कोशेऽस्मिन् नास्ति । (९७-१९)	कर्तुमुचितमिति प्रतिभाति । यक्ष्मा—कथमिव । मत्सरः—(कर्णे) एवमिव । (४१७-२, ३, ४)

सप्तमाङ्के

निखिलामयजननकरं निजपातं (९८-१३)	निखिलामयजननकरं निजघान (४२०-३)
*गुडूच्यादिपञ्चभद्रकषायं निकषा य-न्नवं (?) तमवलोक्य (९८-१४)	गुडूच्यादिपञ्चभद्रकषायौ निकषा यत्नवन्तावलोक्य (४२१-१)
समरजनैरपि (९९-१२)	समस्तजनैरपि (४३२-२)
*मन्त्री—'भक्ताय भवते कदापि मया दर्शयिष्यते साम्बः' इति भगवत्या तुभ्यं जातुचिदावेदितं भक्तया। इति कदाचित्कथान्तरे देवेनैव मां प्रति प्रागुक्तम्। (९९-२६, २७)	मन्त्री—'भक्ताय मया कदाचिद्भवते दर्शिष्यते साम्बः। इति भगवत्या तुभ्यं जातुचिदावेदितं भक्तया॥' इति कदाचित् कथान्तरे देवेनैव मां प्रति प्रागुक्तम्। (४३५-३, ४; ४३६-१)
भगवद्दर्शनार्थं (१००-१, २)	भगवतः परमेश्वरस्य दर्शनार्थं (४३६-२)
*भक्तवत्सला (१००-६)	भक्तवत्सलता (४३७-१)
*घोषन्मृदङ्गः (१००-१९)	घुष्यन्मृदङ्गः (४४०-३)
*विखिलक्षत्रियकुलजिघृक्षवे (१०१-२, ३)	निखिलक्षत्रियकुलजिघांसवे (४४२-२, ३)
भुवमुत्तरन्त्याः (१०१-६)	भुवमवतरन्त्याः (४४३-३)
*विभ्रम्याकाशगङ्गा विधिभुवनभुवः (१०१-११)	विभ्रश्यन्त्यभ्रगङ्गा विबुधजनभुवः (४४४-४)
नीललोहितेन विसृष्टः (१०१-१४)	भगवता विष्टपगुरुणा शिपिविष्टेन सृष्टः (४४५-२)
प्रहारश्छिन्नग्रीव (१०१-२२)	प्रहारच्छिन्नग्रीव (४४८-२, ३)
कार्यार्थमुर्व्यादिभिः (१०२-१)	कार्यैर्यमुर्व्यादिभिः (४५०-१)
पुरस्तत् (१०२-२४)	पुरस्तात् (४५५-४)
*तदहम् (१०३-३)	तमहम् (४५६-२)
*(इति प्रणमति।) (१०३-४)	(इति मन्त्रिणा सह प्रणमति।) (४५६-३)
देव्यैवमनुगृहीतोऽसि (१०५-१४)	देव्यैवानुगृहीतोऽसि (४७०-३)
अनुगृहीतैवेयम् (१०५-१८)	अनुगृहीता एव वयम् (४७१-१)
य एवमालम्बनामनुभवति (१०५-२४)	यत एवं सालम्बनामनुभवति (४७२-२)
निर्बीजयोगसंज्ञमसंप्रज्ञात (१०५-२५)	निर्बीजयोगसंज्ञं संप्रज्ञात (४७२-३)
मुनिः सोऽन्यस्यापि (१०६-१३, १४)	मुनिस्तोमस्यापि (४७४-७, ८)

*कालो जनान्ध्येन (१०७-१)	कल्ये जनान्ध्येन (४७६-७)
तावकैरेष (१०७-२२)	तावकैरेव (४८०-२)
*फलं वाञ्छानुरूपं महीं (१०८-७)	फलत्विच्छानुरूपं मही (४८२-२)

तत्त्वार्थानवधूय कार्यविषये स्वैराद्दते केश्चन
स्वैरालक्ष्यधियं विधाय च कृतं प्रागस्य दुर्मुद्रणम् ।
ग्रन्थं संप्रति संभृतं गुरुगुणैः क्लेशेन कोशान् निरी-
क्ष्यैनं शोधितमादरेण रसिकाः पश्यन्तु तुष्यन्तु च ॥

मे. दुरैस्वामि अय्यङ्गार्.

श्रीः

जीवानन्दनम्

सव्याख्यानम्

प्रथमोऽङ्कः

लक्ष्मीकैरवबन्धुकल्पकतरून् लब्ध्वाप्यलब्धेप्सितं
भूयो मज्जति देवदानवगणे दुग्धाब्धिमुद्धश्रमे ।
तस्यानन्दधुना समं समुदयन् कुम्भं सुधापूरितं
बिभ्राणः स्वकरे करोतु भवतां भद्राणि धन्वन्तरिः ॥ १ ॥

व्याख्या—नन्दिनी

मध्येमरुद्वृधाद्वीपं लोकातङ्कनिवृत्तये ।
धन्वन्तरिं पुरस्कृत्य स्थितं रङ्गेशमाश्रये ॥

मेलपाक्काभिजनस्य मेध्यचरितोत्तंसस्य विद्वन्मणेः
श्रीमन्नैध्रुववीरराघवगुरोश्छात्रेण पुत्रेण च ।
जीवानन्दननाटकस्य सरसा व्याख्या दुरैस्वामिना
साहित्यागदतन्त्रयो रसविदा निर्मीयते नन्दिनी ॥

नाटकेषु नान्दीति प्रथमतः प्रारिप्सितस्य ग्रन्थस्य निष्प्रत्यूहेण निर्वहणं अभिकाङ्क्षन्तः प्राक्तनाः कवयः सर्वेऽपि प्रकरणमेकं अभिष्टुतेष्टदेवतारूपं प्रणीय, तदनन्तरमेव रूपकस्याभिप्रेतार्थस्य निरूपणायोपक्रमेरन्। क्रममेनं अनुरुध्य, प्रस्तावनात्वेन प्रसिद्धस्य पूर्वाङ्गाख्यस्य प्रकरणस्य प्रधानाङ्गभूतां श्लोकद्वयेनाष्टपदात्मिकां तामेव नान्दीं तत्रभवान् प्रौढः कविः आनन्दरायाध्वरी प्रस्तौति।

लक्ष्मीति। धन्वन्तरिः भवतां भद्राणि-श्रेयांसि करोतु। तस्य भगवतो धन्वन्तरेः प्रादुर्भावविभवप्रकारं परिशिष्टः प्रतिपादयति पद्यभागः। लक्ष्मीः, कैरवबन्धुः-चन्द्रः, कल्पकतरुः तान् लब्ध्वापि-तत्तादृशान् ईप्सितार्थवितरणविचक्षणान् विलक्षणप्रभावान् पदार्थविशेषान् प्राप्यापि, अलब्धं-अप्राप्तं ईप्सितं-अमृताख्यं अभिमतफलं येन तस्मिन्, (लब्ध्वाथ लब्धेप्सिते इत्यसाधुः पाठः) देवाश्च दानवाश्च देवदानवाः तेषां गणे-समूहे, भूयः-पुनरपि, ऋद्धः-अभिवृद्धः श्रमः यस्य तस्मिन्; सङ्कल्पितार्थस्य समधिगमे व्यग्रचित्ततया कथंचिदगणितसुदुर्भरक्लेशं यथा तथेति भावः। दुग्धाब्धिं-क्षीरसागरम्, मथ्नति सति, तस्यदेवदानवगणस्य, आनन्दथुना समं- आनन्देन सह, (स्यादानन्दथुरानन्दः इत्यमरः) (आनन्दधुरा इति पाठे, आनन्दस्य धूः-भरः तया, निर्भरोज्जृम्भदानन्देन साकमित्यर्थः) सुधापूरितं-अमृतेन पूर्णम्, कुम्भम्, स्वकरे-आत्मनो हस्ते, बिभ्राणः-वहन्नेव, समुदयन्-आविर्भवन्, धन्वन्तरिः इत्यनेनान्वयः। क्षीराब्धिमथनावसरे प्रादुर्भूतस्य नारायणांशभूतस्य भगवतो धन्वन्तरेः ऐतिहासिकी कथा त्वेवं श्रूयते—"नारायणांशो भगवान् स्वयं धन्वन्तरिर्महान्। पुरा समुद्रमथने समुत्तस्थौ महोदधेः। सर्ववेदेषु निष्णातो वैद्यतन्त्रविशारदः" इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ९१ अध्याये। काशीराजवंशे दिवोदासापरनाम्ना जातो धन्वन्तरिः अपर इति संभावयामः। स एव सुश्रुतादिभ्यः शल्यतन्त्रमुपादिशत्। चिकित्सातन्त्रं अष्टधा च स एव व्यभजदिति आचक्षते प्राज्ञः। सूच्यार्थान् आनन्तरिकस्य पद्यस्य व्याख्यावसरे विवृणुमः॥ १॥

अपि च ।

प्राग्जन्मीयतपःफलं तनुभृता प्राप्येत मानुष्यकं
तच्च प्राप्तवता किमन्यदुचितं प्राप्तुं त्रिवर्गं विना ।
तत्प्राप्तेरपि साधनं प्रथमतो देहो रुजावर्जित-
स्तेनारोग्यमभीप्सितं दिशतु वो देवः पशूनां पतिः ॥ २ ॥

प्राग्जन्मीयेति । आरोग्यस्य परिपालनमेव मनुजानां ऐहिकामुष्मिकयोः श्रेयसोः असाधारणं साधनं मन्वानो महामखी कविस्तदेवाशासानः स्वयमीशानं अभ्यर्थयति पद्येनानेन । (' तनुभृतां ' इति पाठो न साधीयान्) तनुभृता-प्राणिना, प्राग्जन्मीयस्य-पूर्वजन्मसंबन्धिनः, तपसः-कृच्छ्रचान्द्रायणादिव्रतरूपस्य सुकृतस्य, फलं-परिपाकरूपम्, मानुष्यकं-मनुष्यत्वम्, प्राप्येत । तत्-मानुषं जन्म च, प्राप्तवता प्राणिना, त्रयाणां-धर्मार्थकामाख्यानां वर्गः तत्समाहारः-त्रिवर्गम्, तद्विना, अन्यत् किं प्राप्तुं उचितम् ; भवेदिति शेषः । मानवजन्मनः प्राप्तिस्तदैव माननीया स्यात्, यदा वर्गत्रयसाधनाय सर्वथा तदुपयुज्यते जन्मेति भावः । रुजावर्जितः-रोगरहितः, देहः । तत्प्राप्तेः-तस्य त्रिवर्गस्य प्राप्तेरपि, प्रथमतः साधनं-प्रधानोपकरणं भवतीत्यर्थः । तेन-हेतुना, देवः-महादेवाख्यः, पशूनां-अशेषाणामपि स्थावरजङ्गमात्मकानां भावानाम्, पतिः-नियन्ता परमेश्वरः । (" ब्रह्माद्याः स्थावरान्ताश्च पशवः परिकीर्तिताः । तेषां पतिर्महादेवः स्मृतः पशुपतिः श्रुतौ " इति निरुक्तिः ।) अभीप्सितं-त्रिवर्गसाधनोपकरणभूतदेह-धारणस्यासाधारणोपायत्वेन सर्वैः अभिलषितम्, आरोग्यं-निरामयत्वम्, वः-युष्माकम्, दिशतु-वितरतु ॥ २ ॥

अस्मिन् नाटके ग्रन्थस्य नामानुगुण्येन नायको जीवः, बुद्धिः तत्पत्नी, विज्ञानशर्मा त्रिवर्गसाधकमन्त्री, ज्ञानशर्मा अपवर्गसाधकमन्त्री, धारणा-स्मृति-भक्ति-श्रद्धाप्रभृतय आत्मगुणाश्च विदूषकादिभिः सह तत्परिवाराः । जीवस्य

प्रतिपन्थिपक्षे यक्ष्मा प्रतिनायकः, विषूचीं तत्पत्नी, पाण्डुः युवराजः प्रधानामात्यश्च । कासः, तत्पत्नी छर्दिः, कर्णमूलः, कुष्ठः, गलगण्डः, उन्मादः इत्यनेके रोगाः पक्षे यक्ष्मणः परिवारत्वेन परिगण्यन्ते । कामक्रोधादयश्च प्रत्यर्थिपक्षमिमं केचन सन्त्यात्मगुणाः पात्रत्वेन समाश्रिताः । अत्र च पात्राणां सङ्घटनविषये प्रबोधचन्द्रोदय-सङ्कल्पसूर्योदयादिरूपकाणां संविधानक्रमं असौ अनुरुणद्धि कविः । त्रिवर्गसाधनोपकरणभूतस्य देहस्य नीरोगतानिष्पादनाय रससिद्धिसम्पादनमेव मुख्योद्देशः कथानायकादीनाम् । जीवादीनां अभीप्सितार्थस्याभिहनने प्रत्यर्थिसार्थस्य यक्ष्मपुरस्सरस्य भवत्यभिनिवेशः । एवं नायकप्रतिनायकवर्गयोरुभयोरपि देहमेकं अधितिष्ठतोः, तमेव लक्ष्यीकृत्य भवत्येकामिषप्रभवः परस्पराभियोगः । इह प्रथमे पद्ये देवगणशब्देन जीवस्तत्सम्बन्धी च परिवारः, दानवगणशब्देन यक्ष्मा तदनुबन्धी च परपक्षपरिवारः पृथक् परामृश्येते । उभाभ्यामपि जीवयक्ष्मवर्गाभ्यां देहस्य संक्षोभ्यमाणो विषयः सूच्यते दुग्धाब्धिमथनप्रस्तावेन । देवदानवगणाभ्यां मथ्यमानः क्षीराब्धिश्च महान्तं देह इव क्षोभमनुभवति स्म । विद्यमाने परस्पराभिभवार्थे समुद्यमे, जीव-यक्ष्मपक्षयोरपि सुरासुरवर्गयोरिव ऋद्धश्रमत्वं नियमेन संभाव्यमेव । लक्ष्मीकैरवबन्धुकल्पकतरुशब्दैः लक्ष्मीविलास-चन्द्रोदय-कल्पौषधादयः सूच्यन्ते, यैः यक्ष्मपरिवारभूतस्यामयवर्गस्याभिभवः संपत्स्यते । यक्ष्मादिव्याधिनिवहनिषूदनशीलस्य रससिद्धिसम्पादनस्य, तद्द्वारा देहस्य नीरोगतानिष्पत्तिरूपमनोरथसमधिगमजन्यसंमोदातिशयस्य च सूचनं 'सुधापूरितं कुम्भं-आनन्दथुना समं' इत्यादिभिः शब्दैः संपद्यते । अस्मिन् ग्रन्थे प्रकरणानुरोधेन तत्र तत्र विविधानि कायचिकित्सितानि शल्यचिकित्सितानि च प्रस्तूयन्ते । तथैव रसस्य विशेषतः, रसोपरसलोहधातुसम्बन्धिनां यौगिकानां औषधानां सामान्यतश्च सममेव प्रयोगाः, तादृशरससिद्धिलाभाय सभक्त्यतिशयं जीवकृताः उपासनाविधयश्च विद्यन्ते वर्णिताः । अनयोः पूर्वतनो विषयः (काय-शल्यचिकित्सात्मकः) भगवद्धन्वन्तर्युपज्ञ इति तं च प्रथमेन पद्येन, रससम्बन्धिनो विषयस्य च देवः स्वयं उमापतिः उपदेशक आसादिति च विषयतत्त्वं उत्तरत्राभिहितं द्वितीयेन पद्येन च क्रमशः सूचयति कविः ।

(नान्द्यन्ते)

सूत्रधारः—मारिष, इतस्तावत् ।

(प्रविश्य)

पारिपार्श्वकः—भाव, एषोऽस्मि ।

सूत्रधारः—

रीतिः सुखपदन्यासा शारदीया विजृम्भते ।
पूर्णचन्द्रोदयश्चायं निहन्ति ध्वान्तमामयम् ॥ ३ ॥

नान्दीति—यो नाटकस्य मुखे सूत्रधारेण, तिरस्करिण्याः पश्चाद्भागे विद्यमानैः कुशीलवैर्वा मङ्गलस्याशासनरूपः प्रस्तूयते विषयः स नान्दीत्यभिधीयते । तस्याश्च विवरणप्रमाणं यथा—"आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते । देवद्विजनृपादीनां तस्मान्नान्दीति कीर्तिता ॥" इति । **पारिपार्श्वक** इति—नाटकस्य पूर्वाङ्गकर्मसु व्यापृतेष्वेको नटः पारिपार्श्वकः, यं सूत्रधारो मारिष इत्यामन्त्रयति । "सूत्रधारस्य पार्श्वे यः प्रकरोत्यमुना सह । काव्यार्थसूचनालापं स भवेत् पारिपार्श्वकः" इति भरतः । भाव-मान्य । एषोऽस्मि-इह सज्जोऽस्मीत्यर्थः ।

रीतिरिति—शारदीया-शरत्कालसम्बन्धिनी, रीतिः स्वभावः, सुखेन पदानां न्यासः-भूतले चङ्क्रमणमिति यावत्, यस्यां सा, तादृशी विजृम्भते-शरत्कालशोभा विवर्धत इत्यर्थः । (रीतिः खलु पदन्यासादिति न समीचीनः पाठः) अयं-मेघैरनाच्छादितः सन् अद्य विद्यमानः, पूर्णचन्द्रस्योदयश्च, आमयं-आमयवत् लोकमभिभवन्तम्, ध्वान्तं-अन्धकारम्, निहन्ति-सम्यगपोहयति । अर्थान्तरस्य ध्वनिरप्येवं परामृश्यते । शारदीया रीतिः-ग्रन्थस्यास्य वाग्विलासवैखरी, सुखपदन्यासा-सुललितपदप्रयोगभूयिष्ठा सती, विजृम्भते-प्रौढगुणालङ्कृता विराजते इति । तादृशवाग्विलासविकसितज्ञानोदयेन मानसश्च मोहान्धकारः पठितॄणां प्रणश्यतीति च विषयः श्लोकस्य द्वितीयार्धेन ध्वन्यते । अथ विज्ञानशर्ममन्त्रिप्रयुक्तैः सुखोदर्कैः उपायैः, तदुपायोपलब्धपूर्णचन्द्रोदयादिभिः भैषज्यैश्च यक्ष्मरूपस्य महामयस्यान्ततः समुच्छेदपरः काव्यार्थश्च श्लोकेनानेन

अपि च ।

क्रममाणेषु दिगन्तान् जलधरजालेषु शङ्खधवलेषु ।
शान्तिमुपयाति सहसा कालुष्यदशा भृशं पयसाम् ॥ ४ ॥

पारिपार्श्वकः—अतः किमाचरितव्यम् ।

सूत्रधारः—शृणु तावत् । अत्र तज्ञापुरे पौरजानपदा देशान्तरादागताश्च बृहदीश्वररथोत्सवदिदृक्षया सङ्घीभूताः ।

सूचितः । (पूर्णचन्द्रोदयश्चास्यां इति पाठे, अस्यां-शारदीयायां रीत्यामित्यर्थः । न त्वेष सरसः पाठः) ॥ ३ ॥

क्रममाणेष्विति—शङ्खधवलेषु-शरत्कालस्वभावतः शङ्खवत् पाण्डुरेषु, जलधरजालेषु-मेघपङ्क्तिषु, दिगन्तान् क्रममाणेषु-दिशां कोणेषु क्वचित् अतिपतत्सु सत्सु, वीतमेघावरणत्वात् वियत्पथे वैमल्यं सत्यधिगत इति यावत्, पयसां-अपाम्, कालुष्यदशा-कलुषत्वम्, सहसा-झटिति, भृशं शान्तिमुपयाति-सुतरां नैर्मल्यं प्राप्नोति । (कालुष्यं दश दिशां भृशं नूनमिति पाठे, अपेतजलभारत्वात् अम्बुदेषु आशामुखान्यधिगत्य क्वचिन्निलीनेषु दशापि दिशः कालुष्यमपनीय स्वच्छाः संवृत्ता इत्यर्थः ।) प्रधानामात्यं पाण्डुं पुरस्कृत्य पुरुषाधिष्ठानभूते शरीरे महान्तं क्षोभं आचरितवतां यक्ष्मप्रभृतीनां प्रतिपन्थिसार्थानां क्वचित् पलायने ततः क्षोभप्रशमने च समुपनते, विशेषतो झटिति वीतरोगत्वं मनश्शान्तिश्च पुरुषस्य संघटत इत्यर्थश्च सूच्यते ॥ ४ ॥

एतावता च रङ्गस्य प्रसादनम्, प्रस्तुतस्य कस्यचन ऋतोर्वर्णनम्, तदन्तरापतितैरर्थैः प्रकृतप्रबन्धार्थस्य सूचनमिति च नाटकस्य प्रस्तावनाङ्गभूताः केचनानेन विषया वर्णिताः । तथा च "रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः । ऋतुं कञ्चिदुपादद्यात् भारतीं वृत्तिमाश्रयन् ॥" इति ।

अत इति । अतः-शरत्कालः साधु समुपनत इत्यनेन हेतुना, किमाचरितव्यं इति पृच्छति पारिपार्श्वकः । अथवा एवं रङ्गप्रसादनादिपूर्वरङ्गकार्याणां अनन्तरं किं कर्तव्यमिति वा ।

शृण्विति—पौराः-पुरनिवासिनः प्रादेशिकाः, जानपदाः-जनपदे-तज्ञा-

सरसकवितानाम्नो हेम्नः कषोपलतां गताः
विहरणभुवः षड्दर्शिन्या विवेकधनाकराः ।
विदधति तपोलभ्याः सभ्या इमे मम कौतुकं
तदिह हृदयं नाटचेनैतानुपासितुमीहते ॥ ९ ॥

पारिपार्श्वकः—(सशिरःकम्पम्) कं पुनः प्रबन्धमवलम्ब्य ।

सूत्रधारः—नन्वस्ति मम वशे जीवानन्दनं नाम नवीनं नाटकम् ।

पुरप्रान्ते निवासिनः, तञ्जापुरात् दवीयस्सु अपरेषु देशेषु निवसन्तश्च जनाः । तञ्जापुरनगरस्थे देवालये प्रतिष्ठितस्य परमेश्वरस्य बृहदीश्वर इति प्रथितं नाम ।

सरसेति— सरसा-हृदयङ्गमा या कविता-काव्यम्, तन्नाम-तदाख्यं यस्य तस्य, हेम्नः-स्वर्णस्य, कषोपलतां-गुणागुणनिरूपणोपयोगिघर्षणशिलात्वम्, गताः-प्राप्ताः । ("तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः । हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा" इतिवत् ।) षण्णां दर्शनानां समाहारः-षड्दर्शिनी तस्याः, विहरणभुवः-क्रीडनस्थलसदृशाः, (न्यायवैशेषिकसाङ्ख्ययोगमीमांसावेदान्ताभिधानि शास्त्राणि षड्दर्शनानि ।) निस्संशयावगतनिखिलशास्त्रार्था इत्यर्थः । विवेक एव धनं-अमूल्यं द्रव्यम्, तस्य आकराः-निधयः । सदसद्व्यक्तिहेतव इति यावत् । तपोलभ्याः-पूर्वोक्तप्रकारेण गुणप्रकरस्याकरत्वात् सुकृतसंपादनीयसंदर्शनाः, इमे-पुरस्तात् संनिहिताः, सभ्याः-सभासदः, मम कौतुकं-औत्सुक्यम्, विदधति-उपजनयन्ति । तत्-तस्माद्धेतोः, इह-अस्मिन् सन्दर्भे, हृदयं-मम मनः, एतान्-अत्र समुपस्थितान् सदस्यान्, नाटचेन-नाटकप्रयोगेण, उपासितुं-प्रीणयितुम्, ईहते-अभिलषति । अनेन पद्येन, गुरुदेवेत्यारभ्य भर्तुं लालयितुमित्यन्तेन वक्ष्यमाणैः आनन्तरिकैश्च पद्यादिभिः प्ररोचनाख्यं नाटकाङ्गं प्रस्तूयते । "प्रेक्षकाद्युन्मुखीकारः प्रस्तुतार्थप्रशंसया । प्ररोचना स्यात्" इति, "कविकाव्यनटादीनां प्रशंसा च प्ररोचना" इति च तल्लक्षणम् ॥

जीवानन्दनमिति । त्रिवर्गस्य चापवर्गस्य च साधनसामग्र्याः सरसनाटकरूपेण प्रतिपाद्यमानत्वात्, प्रत्यगात्मनो जीवस्य तदिदं आनन्दजनकं नाटकम् । अतोऽभिधीयते जीवानन्दनमिति । जीवनन्दनमिति च क्वाचित्को

पारिपार्श्वकः—कस्तस्य प्रबन्धस्य कविः ।

सूत्रधारः—विद्वत्कविकल्पतरुः आनन्दरायमखी । स एष इह—

गुरुदेवद्विजभक्तो नैमित्तिकनित्यकाम्यकर्मपरः ।
दीनजनाधीनदयो विहरति समरे च विक्रमार्क इव ॥ ६ ॥

व्यवहारः । परं तु ग्रन्थस्यावसाने "परमानन्दघनोऽस्मि नित्यतृप्तः" इति कविनैव जीवविशेषणत्वेन निर्दिष्टः 'आनन्दघन' इति शब्दः जीवानन्दनम् इति नामैव कविकल्पितमिति सूचयति । आनन्दशब्दवाच्यं कवेर्नाम च तदेव दृढयति ।

विद्वदिति । विद्वत्कविकल्पतरुः-सर्वतोमुखेन वैदुष्येण काव्यरचनाचातुर्येण च संपन्न इत्यर्थः । अथवा कवेरस्य राज्याधिकृतत्वात्, काङ्क्षितार्थप्रदानेन विदुषां कवीनामपि काममादरणशील एष इति च समञ्जसोऽर्थः ।

गुर्विति । सः-तथा विद्वत्कविकल्पतरुत्वेन प्रथितः । एषः-अस्य प्रबन्धस्य रचयिता आनन्दरायमखी । गुरुदेवद्विजभक्तः-आचार्यदेवताब्राह्मणेषु विहितभक्तिः । नैमित्तिक-नित्य-काम्यकर्मपरः । कर्माणि तावत् नित्यानि, नैमित्तिकानि, काम्यानि चेति स्मृतिविहितानि त्रिविधानि । तत्र स्नानसन्ध्यावन्दनाग्निहोत्रब्रह्मयज्ञादीनि प्रत्यहं निर्वर्तनीयानि नित्यकर्माणि । पुत्रजन्मोपनयनविवाहादिनिमित्तकम्, श्राद्धादिकमन्यच्च नैमित्तिकं कर्म । काम्यं नाम-"यत्किञ्चित् फलमुद्दिश्य यज्ञदानजपादिकम् । क्रियते कायिकं यच्च तत् काम्यं परिकीर्त्यते ।" एवंविधेषु त्रिविधेष्वपि स्मार्तेषु कर्मसु निरतः । दीनजनानां-दौर्गत्याभिभूतानां प्रजानाम्, अधीना-आयत्ता, दया यस्य सः, अनाथानां आतुराणां चानुकम्पीति यावत् । (निस्स्वस्तु दुर्गतो दीन इत्यमरः) न केवलमेष कर्मठः, नापि केवलं आर्तजनविषये विशिष्य दयार्द्रहृदयः, परं तु समरे-रणाङ्गणे च, विक्रमार्कः-निरङ्कुशपराक्रमप्रतिपन्नयथार्थनामा सुप्रथित उज्जयिनीपतिरिव, विहरति-अवाप्ताखिलाभीष्टत्वात् निर्जितनिखिलबाह्यान्तर्वैरित्वाच्च सुखमास्त इत्यर्थः । पराक्रमप्रकटनपरेऽर्थे तु, सति युद्धे सावहेलं सङ्ग्रामकार्याणि संपादयतीति वाच्यम् ॥ ६ ॥

अपि च ।

यः स्नातोऽजनि दिव्यसिन्धुसलिले यश्चात्मविद्याश्रितो
येनाकारि सहस्रदक्षिणमखो यः सद्भिराश्रीयते ।
सोऽयं त्र्यम्बकरायय्वतिलको विद्वत्कवीनां प्रभोः
यत्तातस्य नृसिंहरायमखिनस्तुल्यप्रभावोऽनुजः ॥ ७ ॥

यः स्नात इति । यः-त्र्यम्बकरायः । दिव्यसिन्धुः-गङ्गा, तस्याः सलिले-तीर्थोदके । स्नातोऽजनि-स्नातवान् । प्राक्तने काले प्रजविनां प्रवहणानामसम्भवात्, वनगिरिभूयिष्ठानां मार्गाणां च सुदुर्गमत्वात्, दक्षिणापथात् अतिदवीयसि स्थितां गङ्गां प्रति प्रस्थानं न सर्वेषां बहुधा सुसाधमासीत् । अतः सुदुर्लभं सुरनदीस्नानरूपं सुकृतमलभतेति प्रशंस्यते । यश्च आत्मविद्याश्रितः-अध्यात्मशास्त्राध्ययनप्रवचनेषु निरतः । (स्वात्मविद्याश्रित इति पाठे साध्व्यां आत्मविद्यायां अधिगतश्रद्ध इत्यर्थः ।) येन च सहस्रं-सहस्रसङ्ख्याकानि स्वर्णानि दक्षिणा यस्मिन् स सहस्रदक्षिणः, स चासौ मखः-यज्ञः, अकारि । यः सद्भिः-विद्वद्भिः, (विद्वान् विपश्चिद्दोषज्ञः सन् सुधीः इत्यमरः ।) साधुभिश्च । आश्रीयते-सेव्यते । सः-तादृक्प्रभावविशिष्टः । अयं-अद्य प्रस्तूयमानः । यज्वनां-यथाविधिनिर्वर्तितक्रतूनाम्, (यज्वा तु विधिनेष्टवान् इत्यमरः ।) तिलकः-वरिष्ठः । त्र्यम्बकरायाख्यो यज्वतिलकः । विद्वांसश्च कवयश्च तेषां प्रभोः-धुरीणस्य । अथवा विद्वत्कवीनाम्, प्रभोः आस्थानाधिकारिणः । नृसिंहरायमखिनः-तदाख्यया विख्यातस्य । यस्य-आनन्दरायमखिनः, तातस्य-पितुः, आनन्दरायजनकस्येति यावत् । तुल्यप्रभावः अनुजः-तत्समानमहिमा कनीयान् भ्राता । अभूदिति शेषः । प्रकृतप्रबन्धनिर्मातुः आनन्दरायमखिनः पिता प्रथितः प्राज्ञप्रकाण्डो नृसिंहरायाध्वरी । तस्य च गुणैस्तादृशैर्गरिष्ठः कनिष्ठो भ्राता त्र्यम्बकरायमखी नामासीत् । प्रस्तुतस्य कवेः तत्पितृपितृव्यादीनां च विपश्चिदग्रिमत्वम्, विहितविविधाध्वरधूर्वहत्वम्, राज्याधिकारसमज्यादिनिर्वहणनिरतत्वं च कुलक्रमागतमिति निर्वर्णयन्, ग्रन्थस्यास्य विशिष्य वक्तृवैलक्षण्यं कविः सूत्रधारमुखेन सूचयति ॥ ७ ॥

पारिपार्श्वकः——(सबहुमानम्) आः, ज्ञायत एवायम्। किं त्वस्य सर्वलोकविदिता अप्येते गुणाः प्रबन्धनिर्वाहधूर्वहत्वमवबोधयितुं नेशते। यतः——

आराध्नोति यदेष भक्तिभरितो देवान् द्विजातीन् गुरून्
यच्च श्रद्दधदातनोति समये नित्यादिकर्मत्रिकम्।
यद्दीनेषु दयां करोति समरे शौर्यं यदालम्बते
तत् सर्वं नरसिह्मयज्वसुततालाभस्य लीलायितम् ॥ ८ ॥

आ इति स्मरणद्योतकं अव्ययम्। ज्ञायत एवायम्-विदितचर एव कविरेषः। (ज्ञात एवेत्यपि पाठान्तरम्।) प्रबन्धनिर्वाहधूर्वहत्वं-ग्रन्थरचनाक्षमत्वम्। नेशते-न प्रभवन्ति। ग्रन्थनिर्माणनैपुण्यविषये संभवतः संशयस्य हेतुं पद्येनानन्तरिकेण विशदयति।

आराध्नोतीति। एषः-आनन्दरायमखी। भक्तिभरितः सन् देवान् ब्राह्मणान् गुरूनपि यत् आराध्नोति-पूजयति। नित्यादिकर्मत्रिकं-पूर्वनिर्दिष्टं नित्यं नैमित्तिकं काम्यं च त्रिविधं कर्म। श्रद्दधत्-आहितश्रद्धः सन्। समये-यथोचिते काले। यच्च आतनोति-अनुतिष्ठति। दीनेषु-अकिञ्चनेषु यत् दयां करोति। समरे-युद्धे। शौर्यं आलम्बते इति यत्। तत् सर्वं-अभिहितं अखिलमपि गुणजातम्। नरसिह्मयज्वनः-नृसिह्मरायमखिनः, सुततालाभस्य-पुत्रत्वरूपविशिष्टफलस्य। लीलायितं-विचेष्टितम्। आनन्दरायमखिनि अवलोक्यमाना अखिलाश्चैते गुणा विभवाश्च नृसिह्मरायाध्वरिणः कथंचिदस्मिन् आत्मजत्वसंबन्धात् संक्रान्ताः, न तु स्वात्मनः समुद्यमबलेन प्रावीण्यप्राशस्त्येन वा जाता इति भावः। (एतत्पितुः नृसिह्मरायाध्वरिणस्तु असाधारणः प्रभावो विद्यापरिणये एवमस्ति वर्णितः——

"नानापूर्वमहाक्रतुप्रणयनैरध्यात्मसंमर्शनैः
कर्मब्रह्मपथप्रचारसविता षड्दर्शनीवल्लभः।
तातो यस्य किलैकराजवसुधाधौरन्धरीगीष्पतिः
क्षोणीपालकिरीटलालितपदः ख्यातो नृसिह्माध्वरी ॥"

इदं तु श्रोतव्यम् ।

आनन्दरायमखिनो वाल्मीकेरिव योगिनः ।
इतरापेक्षणात् सारः स्वतः सारस्वतोदयः ॥ ९ ॥

सूत्रधारः—(विहस्य) मारिष, तत्त्वं न जानासि यत एवं ब्रवीषि । शृणु तावत् ।

तत्रैव तदनुजश्च प्रशंसित एवम्—

"यस्य तातानुजन्मापि यशःपावितदिङ्मुखः ।
त्रिवर्गफलसम्पन्नस्त्यम्बकामात्यदीक्षितः ॥"

इति ॥) ॥ ८ ॥

आनन्दरायेति । आनन्दरायमखिनः-कवेरस्य । योगिनः-निदिध्यासननिष्ठायां बद्धश्रद्धस्य । वाल्मीकेरिव । इतरापेक्षणात्-पुरुषान्तरसंबन्धसद्भावादिति यावत् । सारस्वतोदयः-वाक्प्रवृत्तिः । स्वतः-यदृच्छयेति भावः । सारः-रसवान् । अभूदिति शेषः । (प्राक् प्राचेतसः कस्यचन शापस्य वशंगतः संतप्तहृदयश्चिराय महत्तपस्तेपे । ततः प्रसन्नचेताः परमेष्ठी स्वयमागत्य शापापनयोपायस्य उपदेशपूर्वकं रामायणरूपसारस्वतोदयस्य च तं अधिकारित्वेनानुगृहीतवानिति ऐतिहासिकी कथा । तथा च स्कान्दे पातालखण्डे अयोध्यामाहात्म्यनिरूपणप्रकरणे—"शापोक्त्या हृदि सन्तप्तं प्राचेतसमकल्मषम् । प्रोवाच वचनं ब्रह्मा समागत्य सुसत्कृतः । न विषीद स वै रामो मृगयां चर्तुमागतः । तस्य संवर्णनेनैव सुश्लोक्यस्त्वं भविष्यसि ॥" इति । ब्रह्मणः साहाय्यात् वाल्मीकिरिव, पितुः साहाय्यात् आनन्दरायमखी च कवितायां प्रवृत्तो न तु स्वकीययैव शक्त्या इति तात्पर्यम् ।) वेदकविर्नाम कोऽपि महाविद्वान् आनन्दरायमखिनो ग्रन्थरचनायां साहाय्यं सुमहदाचरितवान् इति च श्रूयते । तमेव वृत्तान्तं 'इतरापेक्षणात् सारः' इति वाक्यं सूचयतीति च वक्तुं शक्यते । कवेः सामर्थ्यस्य स्थूणानिखनन्यायेन सर्वथा दृढीकरणार्थं एष च पूर्वपक्षप्रकारः ॥ ९ ॥

विहस्येति । विहसनं इह पारिपार्श्वकोक्त्यां अनादरसूचकम् । तत्त्वं-

आबाल्यादपि पोषितोऽजनि मया प्रेम्णा तथा लालित-
स्तेनासौ सरसामुपैतु कवितामानन्दरायाध्वरी ।
इत्येकक्षितिपालवंशजलधेर्देव्या गिरां जातया
श्रीशाहावनिनायकाकृतिभृता नूनं प्रसादः कृतः ॥ १० ॥

अत एव—

कवीनां पूर्वेषां कथमपि च चित्तैरवहितैः
गृहीता या नासीत् सरसकवितासारपदवी ।

याथार्थ्यम् । न जानासि । (त्वं न जानासि इति पाठे, तत्त्वमिति कर्म अध्याहार्यम् ।) शृणु तावत्-भूतार्थं अभिधीयमानं आकर्णयेत्यर्थः ।

आबाल्यादिति । आबाल्यादपि-अपि शैशवात् प्रभृति । आनन्दरायः, मया-शाहभूपतिरूपया शारदादेव्येति यावत् । पोषितोऽजनि अभिवर्धितोऽभूत् । प्रेम्णा तथैव लालितः । तेन हेतुना । असौ-आनन्दरायाध्वरी । सरसां-सहृदयास्वादनीयाम् । कवितां उपैतु-काव्यरचनानैपुण्यं आसादयतु । इति काङ्क्षिण्या । एक इति वंशनाम । एकाख्यः क्षितिपालवंशः-राजवंशः, स एव जलधिः तस्मात् । जातया-समुत्पन्नया । श्रीशाहावनिनायकाकृतिभृता-श्रीमतः शाहाजिनाम्नो भूपतेः स्वरूपं धृतवत्या । गिरां देव्या-सरस्वत्या । प्रसादः कृतः-अनुगृहीतः । नूनं-निश्चये । (द्वित्राः शाहाजिनामधारिणो माहाराष्ट्रा नृपतयः तञ्जापुरराज्यं अशासन्निति ज्ञायते । तेषु प्राथमिकस्य शाहभूपतेः (शहाजि) सोऽयं आनन्दरायमखी स्वयमासीत् सचिव इत्यवगम्यते । स च महीपतिः महान् पण्डितः सुतरां पण्डितजनपक्षपाती चासीत् । आनन्दरायमखिनि चात एवाहितानवधिकादरातिशयश्चासीदिति प्रसिद्धिः ।) वाग्देवीप्रसादप्रतिपन्नवाग्विभवः स एष कविः स्वयं काव्यरचनासमर्थ आसीदिति फलितोऽर्थः ॥ १० ॥

कवीनामिति । अतएव-समधिगतसरस्वतीप्रसादतयैव । या । कवितायाः सारः कवितासारः, सरसश्चासौ कवितासारश्च सरसकवितासारः, तस्य पदवी-